Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ६८८३ - घ

Title मेघदूतम् टीकाशिशुहितैषिणी सहिता

Author ..........

Extent ३० .......... Age १८७१

Subject काव्यम् .......... अपूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative


नं०७८३-घ

मेघदूतम् टीका शिशुहितैषिणी
सहिता (अपूर्णम्)

पत्राणि ३०

(का०यम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative




पृ-२०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे·टी·
१

॥श्रीगणेशाय नमः॥ इह यद्यपि गिरिनगसागरसरित्सरोवरकमलाकरवसंतोत्सवोत्सवमलयानिजलक्रीडापुष्पावचयचंद्रसूर्योदयास्तमयसं
सर्गसंबंधादीनां महाकाव्यलक्षणानामभावस्तथापि महाकविश्रीकालिदासविरचितत्वात् इदं महाकाव्यमुच्यते॥ रामगिर्यलकाद्युल्लेखेन तु
हृदयसुवेद्यः कश्चिल्लेखो मयाप्यत्र निदेशोपयुज्येत मयेत्यल्पप्रसंगेन तत्राद्यमादिश्लोकः॥ कश्चित्कांतेति॥ कश्चिदनिर्दिष्टनामा यक्षः रामगिर्याश्रमे
षु वसतिं चक्रे कृतवान्॥ रामो दाशरथ्यात्मजः तेन आश्रितो गिरिः अथवा सीतासमन्वितो रामः तत्र स्थितत्वात् रामगिरिः तत्रत्या आश्रमाः तपोधन
निवासाः रामगिर्याश्रमाः तेषु रामगिर्याश्रमेषु रामगिरौ वसतिं कृतवान् इति वाच्ये कश्रमाश्रमोपादानं तेन दुस्तपस्तपप्रभावात्॥ मुनीनां

कश्चित्कांताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः॥ यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छा
यातरुषु वसतिं रामगिर्याश्रमेषु॥१॥

मपि शापसंतापनाय तमल्पमनस्केषां शरणमनुसंतदिति उच्यते॥ यो यद्यपि देहेमस्यैकाकित्वादाश्रम
इत्येकवचनमेव त्याज्यं तथापि विरहिणो हि गाढोत्कंठाघटितरणरणिकाकुलीकचेतसा नैकत्रावस्थानं संभवति कदाचि
त्कस्मिन्नाश्रमे दिवसमतिवाहयति इति बहुवचनं रामोपि देवादिपुक्तेस्तत्र निवसेत् सीतायाः सार्द्धं पुनः संयोगमास
माद तन्न मनाप्येवं भूयादिति व्यज्यते॥ किं विशिष्टेषु रामगिर्याश्रमेषु जनकतनयास्नानपुण्योदकेषु जनकतनया सीता तस्या जलक्रीडायानि
समविद्रोघैर्वा यानि स्नानानि तैः पुण्यं पवित्रं उदकं येषु ते जनकतनयास्नानपुण्योदकास्तेषु जनकतनयास्नानपुण्योदकेषु विदेहदुहिता
वनपानीयेषु ननु राघवं निकटवर्त्तिनि सति सीतायाः स्नानाघ्यं कथं संभवति॥ महासतीत्वात् स्नानस्वभाववचपलानां नारीणां दुर्लभं त्रैलोक्यं
तच्चेतस्मात् स्त्रोजगत्प्रसिद्धं॥ अतो रामस्नानपावनत्वे सत्यपि पयसां सीतास्नानपवित्र्यमेव निर्दिष्टं अपि च कवेः शृंगाररसात्मोद्भविना यक्षनिर्देशास
मानः कश्चिदित्यनेन कथयात्मादिकत्वं सूचितं॥ किं विशिष्टेषु रामगिर्याश्रमेषु स्निग्धच्छायातरुषु सर्वापरदिग्विभागभाजि न्यविसवितरियेषां
छाया न परिवर्त्तते ते छायातरवः कथ्यंते। स्निग्धा अरूक्षा सरलपल्लवोल्लासिनाच्छायातरवो येषु ते स्निग्धच्छायातरवः तेषु स्निग्धच्छाया

राम:
१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तरुषु यदि वा छायापंक्तिः तस्यां तरवः यदि वा छाया शोभा तद्युक्तैस्तरवः यदि वा छायायाः तदर्थं तरवः यदि वा छायादिनप्रतिपालनं त-
याविधास्तरवस्तेषु दुर्वाक्तमनेकार्थे छायापंक्तौ प्रतिमायामयो विन्यनातपे उत्काचे पालने कांतौ शोभायां वतमस्यापि कथमसौ यक्षो-
— वरपुरीं विहाय मुनिजननिवासो चित्तस्थाने पुनिवासमकार्षीत् इत्याह। कथंभूतो यक्षः अस्तंगमितमहिमा। अस्तंगमितो महिमा
यस्य असौ अस्तंगमितमहिमा। अणिमाद्यष्टविकल्पप्रतिहतमाहात्म्यः केन भर्तुः स्वामिनः शापेन कीदृक् महिमा दूरदेशस्य दर्शनाव-
वहितवचनश्रवणं परिजनाभिगम्यत्वादिलक्षणो देवतास्वभावः तुल्यो ऽपि महिमा तस्यास्तंगमितस्तेनायमकिंचित्करं इव तत्र स्थितवानि-
त्यर्थः। अपनितमहिमेत्यादि वक्तव्ये। कथमस्तंगमितमहिमेत्युक्तत्वात्। अस्तं येषां गतानां न तस्य नाशः पुनरेवाभ्युदयो भवति। तथा तस्या-
पि निजकांतया सह पुनः संयोगो भविष्यतीत्यत एव अस्तंगमितमहिमेत्युक्तम्। कस्मात्संप्रमुक्तशापः। किंविशिष्टो यक्षः यस्मात्स्वाधिकार-
प्रमत्तः स्वश्चासौ अधिकारश्च स्वाधिकारः तत्र प्रमत्तः अप्रयत्नेपरः स्वाधिकारप्रमत्तः कीदृक् अधिकारः एतदुक्तं भवति॥ अस्य हि यक्षाधिप-
तेर्देवतार्चननिमित्तं मानसः सहस्रकमलानयनमधिकारः तत्र कदाचिदसौ यक्षी प्रेमपरवशः प्रत्यूषे गंतुमनीशो निशायामेव मुकुलान्यानि-
नायं तैश्चार्चनाधिपतिः यावती निरजयन्नन्यतमकमलमध्ये मधुकरेण दष्टः तमसौ शशाप अपायायचं मुहूर्तमपि निजजायाविरहमसह-
हमानो अपराधवानसि ततस्त्वं तयैव वर्षयावत् वियोगमस्तु। न तु सारेले वशं नः यतो अपराधानुमानेन दंडनीति किंविशिष्टेन शापेन कांतावि-
रहः कांताविरहः कांताविरहेण गुरुः कांताविरहगुरुः तेन कांताविरहगुरुणा। यत एव कांता तत एव विरहस्य गुरुत्वे अथवा कांताविरहे गुरुः उपदेष्टा
कांताविरहगुरुस्तेन कांताविरहगुरुणा। प्रथममेव कांताविरहः तेनैवाध्यानयन्नित्यर्थः अपरं किंविशिष्टेन शापेन वर्षभोग्येन। वर्षः द्वादश-
मासावधिः कालस्तावद्भोग्यः वर्षभोग्यः तेन वर्षभोग्येन। अथवा वर्षेति वर्षं लोकप्रवृत्तिभारततत्त्वे तेन तत्र भोग्यस्तेन तद्वर्षभोग्येन। एतेन मनुष्या-
लोकावस्थानां देवानां नाकवासतुल्यमित्युभयथापि शापस्य दुःसहत्वं विज्ञेयते॥१॥ ॥प्रियासंदेशप्रापणोऽधिगमार्थमाह॥ तस्मि-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे·टी·
२

न्नद्राविति॥ स यक्षस्तस्मिन्नद्रौ रामगिरौ पर्वते मेघं ददर्श जलदमद्राक्षीत् ददर्शेति कोर्थः विरहविधुर प्रेयसी समाश्वासनार्थं संदेशं प्रापयितुं का
मो मत्प्रियं जनं सिद्धिरनेन भविष्यति निश्चकायेत्यर्थः कः। आषाढस्य प्रथमदिवसे प्रथमं प्रधानं च दिवसं च प्रथमदिवसं तस्मिन् प्रथमदिवसे। अथा
दिश्रवारोरे प्रथमइत्युक्ते। ज्येष्ठशुक्लमायामित्यर्थः किं कृत्वा। कतिचिन्मासान् नीत्वा अष्टौ मासान् निर्गम्य प्रियासंदेशे प्रस्तावे शेषान् मासान् गमय
चतुरो लोचने मीलयित्वेति वदमाणत्वात्। किं विशिष्टो यक्षः अबलाविप्रयुक्तः प्रियारहितः किं विशिष्टो यक्षः कामी कामुकः कामित्वादलं का
रण उक्तं च ना नाविदग्धः प्रियं ब्रूयात् नाकामी मण्डनप्रियः। नास्फुटो नाधिकारी स्यात् स्फुटवक्ता न वंचकः। अपरं किं विशिष्टो यक्षः कनकवलयभ्रंशरि

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः। आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्री
डापरिणतगजप्रेक्षणीयं ददर्श॥२॥ तस्य स्थित्वा कथमपि पुरः केतकाधानहेतोरंतर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ। मेघालोके भवति सु
खिनोप्यन्यथावृत्ति चेतः कंठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे॥३॥

रिक्तप्रकोष्ठः कनकस्य वलये कनकवलये कनकवलययोः भ्रंशः क
नकवलयभ्रंशः कनकवलयभ्रंशेन रिक्तो प्रकोष्ठो यस्य सः कनकवलयभ्रंशरिक्तप्रकोष्ठः हाटकपातेऽसन्नं कृतं भुजाग्रः किं विशिष्टं मेघं आ
श्लिष्टसानुं आलिंगिततटं। अपरं किं विशिष्टं मेघं वप्रक्रीडापरिणतगजप्रेक्षणीयं वप्रे क्रीडा वप्रक्रीडा वप्रक्रीडायां परिणतस्तिर्यग्दंतप्रहारी गजो
स्तद्वत् प्रेक्षणीयः दर्शनीयस्तं वप्रक्रीडापरिणतगजप्रेक्षणीयं आश्लिष्टसानुमिति मेघस्य प्रतिसौहार्दमुक्तं। परिणतगज इति मेघस्य सामर्थ्यं विज
नस्य धनदस्य अनुचरो यक्षः चिरं चिरकालं दध्यौ चिंतयामास। किमचिंतयदित्याह॥ स्वाभिप्रायमहमस्मै निवेदयामीति न वेति। किं कृत्वा तस्य पुरः अग्रे
कथमपि महता कष्टेन स्थित्वा। किं विशिष्टस्य तस्य मेघस्य केतकाधानहेतोः केतकीकुसुमोत्पादननिदानस्य। किं विशिष्टो यक्षः अंतर्बाष्पः प्रकृति
धीरत्वात् अप्रवाहवृत्तिः नेत्रसलिलो यश्च यतः कारणात् सुखिनोपि चेतः प्रियजनसंयोगवतोपि मनो मेघालोके जलदावलोकने सति अन्यथा
वृत्तिर्भवति स्वास्थ्याद्भ्रश्यतीति तर्हि कथं मेघागमः सोढव्य इति कंठाश्लेषप्रणयिनि जने कंठाश्लेषः आलिंगनं तत्र प्रणयः प्रीतिर्यस्य सः प्रिय(योसौ)

राम:
२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्रत्यासन्ने नभसि॥ निजप्रियायाः कुशलसंभावनं निरूपणार्थमाह॥ स यक्षस्तस्मै मेघाय प्रीतमनं स्वागतं स्वागतं व्याजहार। कुशलं जगाद। किंविशिष्टाय तस्मै
कुटजकुसुमैः कल्पितार्घाय गिरिमल्लिकापुष्पैर्दत्तार्घाय किंविशिष्टैः कुटजकुसुमैः प्रत्यग्रैः नूतनैः किंविशिष्टं स्वागतं प्रीत्या स्नेहेन सुमुखं प्रधानं वचनं उ।
क्रियर्थत्वात् मद्‌कुशलसुखार्थे चतुर्थी। किंविशिष्टः यक्षः प्रीतः हृष्टचित्तः किं करिष्यन् जीमूतेन मेघेन स्वकुशलमयीं प्रवृत्तिं हारयिष्यन् आत्मनो मनि
हत्तिं वार्त्तां प्रापयिष्यन्। किमर्थं दयिताजीवितार्थं प्रियाप्राणधारणार्थं। क्व सति नभसि प्रत्यासन्ने श्रावणे श्रावणे मासि निकटवर्त्तिनि सति। श्रावणस्य सज
लजलधरगणवभीरुत्वात्। विरहिणां जीविते संशयितुतामारोहति तथाचोक्तं। शिखिनि कूजति गर्जति तोयदे स्फुरति जातिलताकुसुमाकरे। अपि हि पान्थन
जीवति ते प्रियान भसि मासि न यासि गृहं यदि॥ पायोदितस्य पयादस्य प्रार्थनाकथनार्थमाह॥४॥ धूमज्योतिरिति। गुह्यकोयक्षः तं मेघं ययाचे प्रार्थयामा
प्रत्यासन्ने नभसि दयिताजीवितालंबनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिं सप्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुख
वचनं स्वागतं व्याजहार॥४॥ ~~[illegible]~~
~~चेतं करणं प्लेषप्रणयि निजेनैकिंपुनर्दूरसंस्थेनाथ~~॥ धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः॥ इत्यौत्सु
क्यादपरिगणयन् गुह्यकस्तं ययाचे कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥५॥
स। किं कुर्वन् औत्सुक्यात् विरहव्यथाविधूर्णात् इति अपरिगणयन् अ
विचारयन्। इतीति किं। क्व शब्दो महदंतरः क्व मेघः क्व संदेशार्थाः धूमज्योतिः सलिलमरुतां। धूमश्च ज्योतिश्च सलिलं च मरुच्च धूमज्योतिः सलिलमरुतस्ते
षां धूमज्योतिःसलिलमरुतां। अमीषाम चेतनानां प्रत्येकमुपादानं मेघस्यैकोऽतत्तानिश्चेतनत्वप्रतिपादनार्थं। किंविशिष्टाः संदेशार्थाः प्राणिभिः प्राप
णीयाः नेतव्याः तर्हि कथं राजहंसमयूरभ्रमरादिभिः प्रापयिष्यं तद्दसाह। किंविशिष्टैः प्राणिभिः पटुकरणैः अविकलेंद्रियैः ये किल सामान्यैः प्राणिभिरर्पिते
किंतु सर्वेंद्रियपाटवयुक्तैः एव प्रापयितुं शक्यंते॥ तान् संदेशार्थान् यं मेघमनु विकलः कथं नेष्यति तत्पर्यालोचयन्। याच्ञाप्रार्थनां कुर्भवानीत्याह॥ अत एव
गुह्यक इति। उपदेशो व्युत्पत्त्याभिप्रायः इव मन्यते। यात्रापात्रमविचार्यैव गुह्यकीयति तत्प्रतो— ति गुह्यकः केगेरेशाद्देदस्य स्वधातोः प्रयोगः अनौचित्यं अन
र्थांतरन्यासेन निरस्यति। हि युक्तोयमर्थः हि यस्मात्कारणात् कामार्त्ताः कामपीडिताः पुरुषाः चेतनाचेतनेषु विषये प्रकृतिकृपणाः भवंति। स्वभावदीनाः जायं
ते। परवशात् चेतनायां वेसवेतनमप्ययमिति विचार्यितुमशक्यमर्थः॥५॥ श्रीः श्रीः॥ ॥श्रीः॥ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे.टी.
३

जातं वंशे इति॥ याच्ञस्य पदुवचनैः प्ररोचनां विचारयन्नाह॥ हे जलद अहं त्वां पुष्करावर्त्तकानां वंशे जातं जानामि। पुष्करं पानीयं आवर्त्तयंति भ्रमयंति इयंति पुष्क
रावर्त्तकाः प्रधानमेघास्तेषां पुष्करावर्त्तकानां वंशे कुले जातं प्रसूतं वेद्मि। जानामि। किंविशिष्टे वंशे। भुवनविदिते त्रिभुवनविख्याते। किंविशिष्टं त्वां मघोनः देवेंद्रस्य
प्रकृतिं आसो पुरुषः प्रकृतिपुरुषस्तं प्रकृतिपुरुषं आमात्यपुरुषं। अपरं किंविशिष्टं त्वां कामेन स्वेच्छया रूपं यस्य सः कामरूपः तं कामरूपं तेन कारणेन अहं त्व
यि विधिवशे अर्थित्वं गतः याचकत्वं प्राप्तः कस्मात् विधिवशात् दैववशात् दैवपरतंत्रत्वात्। अपरं किंविशिष्टोहं। दूरबंधुः विप्रकृष्टभार्यः अत्र प्रस्तावात् बंधुशब्देन भार्या
। अथवा बंधुः स्वजनः यदि कश्चित्स्वजनोपि मत्समीपवर्त्ती न भवति तत्र न मे वनिजो जयति वरं दैवादेके चाहं तेन त्वया च याञ्चा प्रार्थना अधिगुणे पुरुषे गुणाधि
के पुंसि मोघापि वरं निष्फलापि वरं श्रेष्ठा। अधमपुरुषे नीचपुंसि लब्धकामापि न वरं सफलापि न श्रेष्ठा॥६॥ संतप्तानामिति। प्रार्थनीयस्य परोपका

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः। तेनार्थित्वं त्वयि विधिवशाद्दूरबंधुर्गतोहं याञ्चा मोघा वरमधिगुणे नाध
मे लब्धकामा॥६॥ संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः संदेशं मे हर धनपतिक्रोधविश्लेषितस्य। गंतव्या ते वसतिरलका नाम यक्षेश्वराणां बाह्योद्या
नस्थितहरशिरश्चंद्रिकाधौतहर्म्या॥७॥ रगुणानां वर्णयन्नाह॥ हे जलद संतप्तानां त्वं शरणं असि। यतः कारणात् अन्येषामपि पर्वतद्रुमादीनां दवदह
नेन दह्यमानानां त्वमेव निर्वापयिता शरणमसि। यतः स्वयं गत्वा स्पर्धाविघटितस्य ननु मया संदेशं मादाय त्वदीयविप्रतमसमीपे कं गंतव्यां त्वया यक्षेश्वराणां वसतिर
लका नाम नगरी गंतव्या। कृत्यानां कर्त्तरि वेति षष्ठी। त्वं अहं अलकां रसाभिधानेन उपलक्षयिष्यामि विशेषणद्वारेणाभिधानमाह॥ किंविशिष्टा अलका बाह्योद्या
ने स्थितहरः तस्य शिरः तत्र या चन्द्रिका तया धौतानि धवलीकृतानि हर्म्याणि यस्यां सा। ननु यक्षेश्वराणामिति कथं बहुवचनं सत्यं यक्षेश्वराणामिति बहुवचना
त् तत्र वसति धनपतिख्यातां ख्यापयत धनपतिप्रसिद्धां कथयति॥७॥ त्वामारूढेति। त्वं नत्यो वर्त्तमानमनमं तोयदं प्रलोभयन्नाह॥ हे जलद पथिकवनिताः प्रोषि
तभर्त्तृकाः त्वां प्रेक्षिष्यंते। कथंभूतं त्वां। पवनपदवीमारूढं। आकाशमार्गमासीनं। ननु तारूढस्थानं वन्त्याता लंबालके विघटते तर्हि कथं मां द्रक्ष्यंति किंविशिष्टाः व
निताः उद्गृहीतालकांताः उद्गृहीता ऊर्द्ध्वनीता कुटिलकेशांता याभिस्ताः। ननु तासां रूढस्थाने किं कारणं। तथा चोक्तं॥ संगं शरीरसंस्कारं समयोत्सवदर्शनं।
हास्यं परगृहे यानं त्यजेत्प्रोषितभर्त्तृका। तथा च विरहिणीनां मेघदर्शनमपि द्दश्यमशक्यं। तर्हि कथं कथमद्रक्ष्यंति। किं कुर्वत्यः आश्वासंत्यः स्वस्थचित्ता भवं
त्यः। कस्मात् प्रत्ययात् यदा यदा मेघोदयो भवति तदा तदा सत्पतो यद्देशांतरगदागच्छतीति कः प्रत्ययः हे पयोद त्वयि सन्नद्धे सति विरहविधुरां जायां क उपेक्षेत अ

राम.
३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शुभनिमित्तादिनिवेदनेन यस्त्वं योत्साहयन्नाह ॥ मंदमिति ॥ हे मेघ अश्मानन्दाकुनवल्गात्तु बलाकावकपंक्त्यः हेतनिश्चितं त्वे आकारो भवंतं सेविष्यंते । अवलो
कयिष्यंते । कथंभूतं त्वां नयनसुभगं लोचनाभिरामं ननु सेवायां किं कारणं कस्मात् गर्भाधानक्षणपरिचयात् तस्मात् गर्भाधानक्षणपरिचयात् किल मेघवातस्पर्श
हिताः गर्भं दधतीति प्रसिद्धिः कथंभूता बलाकाः आबद्धमालाः रचितपंक्तयः यथा येन प्रकारेण अयं पवनो वायुः त्वां मंदं मंदं शनैः शनैः सुंदरं प्रेरयति । कथंभू
तो वायुः अनुकूलः इष्टानुगामी किंप्रमाणे काले इष्टाभ्यनुगामी समीरणः शुभसूचको भवति न केवलं पवनो नुदति किं त्वयं चातकः वामः सव्यो वामांपार्श्वे स्थितः सन्
तथा चोक्तं । वामं वासं समायुक्तो भोग्ययोग्यप्रदायिनः तेन तव मधुरं नदति मधुरशब्दं करोति । किंविशिष्टः चातकः सगर्वः सोत्साहः किल मृगापक्षेण अ --- मदो भ
वंति कूजंति कुटिलं गच्छंति इति वा लकोः भवंतं पुरुषं द्रव्यं प्रदेशे सेविष्यंते किंविशिष्टाः स्त्रियः आबद्धमालाः आबद्धा माला मालत्वं याभिस्ताः आबद्धमालाः ॥९॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः प्रेक्षिष्यंते पथिकवनिताः प्रत्ययादाश्वसंत्यः । कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां न स्यादन्योऽप्यहमिव -- नो यः प
राधीनवृत्तिः ॥८॥ मंदं मंदं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगर्वः ॥ गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः सेविष्यंते नयनसुभगं
खे भवंतं बलाकाः ॥९॥ तां चावश्यं दिवसगणनातत्परामेकपत्नीमव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायां ॥ आशाबंधः कुसुमसदृशं प्रायशो ह्यंगनानां सद्यः
पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥१०॥ तां चावश्यमिति ॥ यदि कोलासो चलकलिका अधिष्ठिता यो अलका यां समागतस्य त्वदीयसंगमिं प्रति निरुद्धमाभविष्यं
ति किं सूतां दिवसगणनातत्परां तां तां तर्हि सा अन्याश्चाक्त्रांक यादिवसान्गणयति पुनः किं विशिष्टां एकपत्नीं एकः पतिर्यस्याः सा एकपत्नी तां एकपत्नीं पतिव्रता
मित्यर्थः तर्हि सा निवसति व्रतव्यायार्यस्याः सा एकपत्नी तां एकपत्नीं पतिव्रतामित्यर्थः । तर्हि सा निवसति व्रतव्यासन्नाम विष्यति । किंभूतां अव्यापन्नां जीवतीं । अस्तु
ष्टि तद्धृदयां यत एव एकपत्नी तत्ते एव दिनसमासान्गणयति अत एवेति तत्राह ॥ अत एव जीवतीति तत्राह ॥ तां तु द्रक्ष्यसीति किंभूतस्त्वं अविहतगतिः अस्खलितगतिः कामरूपत्वा
त् ननु परोक्षे परकलत्रदर्शनमनुचितमयोग्यं । पुनः किंभूतां भ्रातृजायां ननु भ्रातृजाया मातृतुल्या भवतीति स्मृतेः अपवित्रमित्यत्र स्थितेन भवतार्थं ज्ञायते । युक्तोय
मर्थः ज्ञायते । युक्तोयमर्थः । हि यस्मात्कारणात् आशाबंधः आशा नाम मालिता प्राप्तिसंभावना बध्यते अनेनेति बंधः आशाया विश्वासवतीस्वरूपा प्रायो बाहुल्येन
अंगनानां हृदयं रुणद्धि निवारयति क सति प्राणत्यर्थे विप्रयोगे सति किंभूतं हृदयं प्रणयि स्नेहनिबद्धं किंभूतं हृदयं कुसुमसदृशं पुष्पवरे सुकुमारं अवामशीघ्र
वार्थं किंभूतं कुसुमं रुणद्धि । पतितं निवारयति क सति विप्रयोगे सति ... सद्यः पाती तत्कालपतनशीलं पुनः किंभूतं हृदयं कुसुमप्रणयि जलार्द्रम् ॥१०॥ १०॥१०॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे॰ टी॰
४

कर्त्तुं यच्चेति॥ ननु असहायकार्यसिद्धिर्नास्तीति सर्वाचार्यैरभिहिते अस्ति तत्कथं मे काकिनो गवतः कार्यसिद्धिः स्यात्। हे जलद भवतस्तव नभसि आकाशे राजहंसाः संप
त्स्यंते भविष्यंति ननु ये सहायास्समाः विशकिशलयच्छेदपाथेयवंतः विशस्य किशलयं विशकिशलयं विशकिशलयस्य छेदः वलमुपजीवतिते तैः किं प्रयोजनं।
किं विशिष्टाः राजहंसाः विशकिशलयच्छेदं पाथेयं शंबलं येषां ते विशकिशलयच्छेदपाथेयवंतः ननु साभिप्राया आईमार्गे निवर्त्तिते तैः किं प्रयोजनं आ कैला
शं यावत्। ननु कैलाशागमने किं कारणं किंभूताः राजहंसाः मानसोत्काः मानसे उत्काः मानसोत्काः ननु उत्कंठिता किं कारणं किं कृत्वा ते तव गर्जितं श्रुत्वा किं लक्ष
णं गर्जितं श्रवणसुभगं कर्णसुखावहं। किं तत् गर्जितं महीं पृथ्वीं उच्छिलींध्रातपत्रां कर्त्तुं प्रभवति उत्कतानि शिलींध्राणि आकाराण्येव आतपत्राणि यत्र सा उच्छिलीं
ध्रातपत्रा तां। उक्तं च अनेकार्थे। छत्रके स्वतजा‾ तथा चोक्तं। उत्तमे तौ वा शिलींध्रं स्यात् येन धुनैः अपराजहंसत्राद्देधन प्रधानत्वेन उक्ते। तथा चोक्तं॥ उत्तमैः

कर्त्तुं यच्च प्रभवति महीमुच्छिलींध्रातपत्रां तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः॥ आ कैलाशाद्विशकिशलयच्छेदपाथेयवंतः संपत्स्यंते न
भसि भवतो राजहंसाः सहायाः॥११॥ आपृच्छस्व प्रियसखममुं तुंगमालिंग्य शैलं वंद्यैः पुंसां रघुपतिपदैरंकितं मेखलासु॥ कालेकाले भवति भव
तो यस्य संयोगमेत्य स्नेहव्यक्तिश्चिरविरहजं मुंचतो बाष्पमुष्णं॥१२॥

सहसो गत्स्यंति तैः सह सत्कथया। अलुब्धैः सह मित्रत्वं कुर्वाणो नावसीदति॥११॥ इदानीमामंत्रकारमाह। हे जलद अमुं शैलं आपृच्छस्व किं कृत्वा
आलिंग्य परिरभ्य आलिंग्यं ददति किं कारणं प्रियसखं अभीष्टं मित्रं वहि मैत्रीकरणयोग्यो न भवति। किंभूतं उच्चैः सारं पुनः किंभूतं शैलं मेखला
सु नितंबभूमिषु रघुपतिपदैः श्रीरामचरणन्यासैरंकितं। किं विशिष्टैः पदैः पुंसां पुरुषाणां वंद्यैः नमस्करणीयैः अमुकं यस्य पर्वतस्य काले काले
वर्षाकाले स्नेहव्यक्तिर्भवति। स्नेहप्राकट्यं भवति॥ किं कृत्वा भवतः संयोगमेत्य प्राप्य तस्य किं कुर्वतः विरहजं उष्णं बाष्पं मुंचतः मुक्तवतः किल अ
न्यस्यापि मित्रस्य चिरस्य चिरयुक्तस्य उष्णं बाष्पं मुंचतः स्नेहव्यक्तिर्भवति॥१२॥ ॥श्री॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ श्रीः॥॥

राम
४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥मार्गं तावदिति॥ इदानीं मार्गोपदेशमाह॥ हे जलद मम कथयतः तावन्मार्गं शृणु आकर्णय। किंभूतं मार्गं त्वत्प्रयाणानुरूपं तव प्रयाणानुरूपं तव प्रयाणं त्वत्प्र-
याणं त्वत्प्रयाणस्य योग्यं तदनु पश्चात् मार्गकथनानंतरं त्वं संदेशं श्रोष्यसि किंभूतं श्रोत्रपेयं॥ सादरमाकर्णनीयं अत्यादरेण श्रवणे श्रवलोकनेवापा-
नमुच्यते हे मेघ यत्र त्वं खिन्नः खिन्नः अतिशयेन परिश्रांतः तत्र त्वं शिखरिषु पर्वतेष्वग्रेषु पदं न्यस्य चरणावारोप्य गंतासि गमिष्यसि यत्र यत्र क्षीणः
क्षीणः क्षामात्क्षामः तृषितः जलरहितः सन् स्रोतसां निर्झराणां पयः उपभुज्यापि त्वं गंतासि किंभूतं पयः परिलघु शीघ्रजरणीयत्वात् लघुतरं लंघ-
च्यते दिव्यशिखरेषु तं पानीयं दूरस्थं वर्षदेव उक्तं श्रोतः शाद्वयत्र प्रस्रवणवाचीनच निर्झराणां ननु दीपर्याप्तः चिकित्सागमविरोधात् किल जल-
कालेन देयं पेयं पाने न प्रतिषिद्धं पंकिलत्वात् दुर्जरं भवति अयं च वर्षाकाले तु भवति॥१३॥ अद्रेः शृंगमिति॥ हे मेघ त्वमस्मात् स्थानात् सरसनि-

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयं॥ खिन्नः खिन्नः शिखरिषु पदं न्यस्य गंतासि यत्र क्षीणः क्षीणः
परिलघु पयः स्रोतसां चोपभुज्य॥१३॥ अद्रेः शृंगं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धांगनाभिः॥ स्थानादस्मात्सर-
सनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान्॥१४॥

चुलात् खं आकाशं उदङ्मुखः सन् उत्पत तर्हि स्थानं
वेधुजननिवर्त्त्ययोग्यं न भवति। किंभूतात् स्थानात् सरसाः सार्द्राः निचुलाः वेतसाः यत्र तत्र स्थितं तस्मात् एतेन जलाशयो लक्ष्यते ज्ञायते किल चेतस्य हि जला-
श्रयो भवति। उक्तं च॥ नदीतीरे गवां गोष्ठे क्षीरवृक्षे जलाश्रये। आरामेषु चतुःपादे दृष्टे वेधुं विसर्जयेत्॥ किं कुर्वन् पथि मार्गे दिङ्नागानां दिग्गजानां स्थूलह-
स्तावलेपान् पीवरशुंडादंडप्रहारान् परिहरन् परिसर्जन्। कोऽर्थः तव व्योम्नि आकाशे संचरमानात्र दृत्तले प्रगतम्भोत्यो परिगलयति बधाद्दानं कारि-
ष्यंति किंभूतस्त्वं दृष्टोत्साहः दृष्ट उत्साहो यस्य स दृष्टोत्साहः कथं यथा भवति चकितचकितं यथा भवति तथा काभिः मुग्धसिद्धांगनाभिः अज्ञान-
सिद्धांगनाभिः भावेनङ्तिहेतोः उन्मुखीभिः कथं इति इति किंस्विदिति वितर्के अयं पवनः वायुः किं अद्रेः शृंगं हरति॥१४॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे मे॰टी॰
५

॥रत्नछायेमिति॥ इदानीं शरीरमूलव्याजेन मेघं प्रलोभयन्नाह॥ हे मेघ पुरस्तादग्रतः आखंडलस्य प्रसाधनभावात्परैः नखंडमिन्द्रधनुर्भवति कस्मा
त्वल्मीकाग्रात् अनियैवरान् पिपीलिकादिकृतो मृत्संचयविशेषो वल्मीकः तदग्रप्रभावात्। अथवा वल्मीकशेषे एव वल्मीकसमीपदेशे लक्षण
या लक्ष्यते॥ अथवा वल्मीकात्स्थितमहानागफणमणिकिरणेभ्यः आहृविधनुः खंडमुत्पद्यत इत्यर्थः॥ किंभूतं धनुःखंडं रत्नच्छायाव्यतिकर
इव बहुधा मणिकांतिसंपर्क इव प्रेक्ष्य एतत् किं धनुःखंडेन येन च शरीरमतितरां कांतिमापत्स्यते। किंभूतं वपुः श्यामं कृष्णं कस्येव विष्णोरिव श्रीकृ॰
ष्णस्य वपुः शरीरं अतितरां कांतिमाप। किंभूतस्य विष्णोः गोपवेषस्य गोपपुत्ररूपधारिणः। गोपालः किल केलिचेतयो वर्हिविच्छेदं माप्नोयंते। एता
वता विज्ञाय धारिणः इन्द्रस्य वर्हिधारधारिणा अस्य शोभां प्राप्स्यतीति भावः। केन वर्हिणा मयूरेण च्छदाम्ना। किंभूतेन वर्हिणा। स्फुरितरुचिना उल्लसित॰
कांत्या॥१५॥ त्वय्यायत्तेति॥ हे मेघ त्वं भूयः उत्तरेणैव व्रज गच्छ। ननु अहं उत्तरमार्गे प्रवर्तमानेन॥ किं कृत्वा मालं मालाभिधानं देशं आरुह्य तस्योपरि

रत्नच्छायाव्यतिकरमिव प्रेक्ष्यमेतत्पुरस्ताद्वल्मीकाग्रात्प्रभवति धनुःखंडमाखंडलस्य। येन श्यामं वपुरतितरां कांतिमापत्स्यते ते बर्हेणेव स्फुरितरुचिना॰
गोपवेषस्य विष्णोः॥१५॥ त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः॥ सद्यः सीरोत्कषणसुरभि क्षेत्रमा
रुह्य मालं किंचित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण॥१६॥ १६॥ स्थित्वा वृष्टिनिर्गरविधायेत्यर्थः। तर्हि मालं कं विद्यते। समगिरेः किंचित्पश्चात् मा लो
विद्यते तर्हि मम मालमाराहेनः कालविलंबो भविष्यति॥ किंभूतस्त्वं लघुगतिः शीघ्रगमनः। तर्हि मां लोकेन साभिज्ञेन च चञ्चलत्वं प्रविष्यामि। किंभूतं
मालं सद्यः सीरोत्कषणसुरभि क्षेत्रं सद्यः सीरस्य लांगलस्य उत्कर्षणेन खंडनेन सद्यः सीरोत्कर्षणं सद्यः सीरोत्कर्षणेन सुरभीणि क्षेत्राणि यत्र तत् सद्यः
सीरोत्कषणसुरभिक्षेत्रं। ननु मम तावता गतस्य किं प्रतिफलं स्यात् किं कुर्वाणः जनपदवधूलोचनैः पीयमानः जनपददेशवधूलोचनैः भ्रूविकारानभि
ज्ञैः ग्राम्यत्वात् विभ्रमकुशलैः ननु तासां सादरमवलोकने किं कारणं इति कारणात्कथं इतीति हे पयोद कृषिफलं त्वयि आयत्तं त्वदधीनं संतिष्ठ
त्वामिति। इदानीं विश्राममार्गमाह॥ हे जलद सानुमान् सानवो विद्यन्ते यस्यासौ सानुमान् शिखरवान् पर्वतः साधुसमोरवं यथा भवति तथा त्वां मूर्ध्ना म
स्तकेन धारयिष्यति। किंभूतः सानुमान् आसारैः रुपलक्षितानि व्यूढानि शृंगाणि यस्यासौ आम्रकूटः ननु मया नदी योपकारं प्रीतिः कीदृशः प्रत्युपकारो

रामः
५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विधेयः किंभूतं त्वां आसारप्रशमितवनोपप्लवं आसारेण वेगवत्या वृष्ट्या प्रशमितः उपशमितो वनस्य उपप्लवो येन तं आसारप्रशमितवनोपप्लवं । क-
थंभूतं त्वां अध्वश्रमपरिगतं अध्वनः श्रमः अध्वश्रमः अध्वश्रमेण परिगतं व्याप्तं अध्वश्रमपरिगतं । ननु स्तानी कथं प्रतीयते । युक्तोयमर्थः । ततः कार-
णात् क्षुद्रोपि कृतोपकारोपि निकृष्टोपि नीचोपि मित्रे प्राप्ते आतिसंश्रयाय आश्रमार्थं विमुखो न भवति पराङ्मुखो न जायते । कया प्रथमसुकृतापेक्षया ।
प्रथमसुकृतः उपकारः प्रथमसुकृतस्य अपेक्षया अनेन पूर्वं मुपकृतं मया तस्य प्रत्युपकारः करणीयः ननु पर्वता अनेके किं कारणं उच्चैर्महात्मा भवति
तस्य पुनः किं भण्यते । ७ ॥ अध्वक्लान्तमिति । उपकारी निमित्ते प्रत्युपकारं युज्यत इत्याह । हे जलद अवश्यं निश्चितं आम्रकूटाभिधानः पर्वतः शिरसा
मस्तकेन धारयिष्यति किंभूतं त्वां अध्वश्रमक्लान्तं मार्गश्रमेण खिन्नं । अपरं किंभूतं त्वां प्रतिमुखगतं सन्मुखगतं किंभूतेन शिरसा तुंगेन उच्चैस्तरेण त्वम-

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ॥ न क्षुद्रोपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमु-
खः किं पुनर्यस्तथोच्चैः ॥ १७ ॥ अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूटः ॥ तुंगेन त्वां जलद शिरसा धारयिष्यत्यवश्यं आसारेण त्वमपि समयेतस्य नै-
दाघमग्निं सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥ १८ ॥ छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैस्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसव-
र्णे ॥ नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १९ ॥ पि तस्य नैदाघमग्निं आसारेण वेगवृष्ट्या शम-
येश्शांतिं नये अतः कारणात् महत्सु विषये उपकारः सत्कारः क्षिप्रेण चिरकालेन न फलति अपितत्क्षणादेव किंविशिष्ट उपकारः सद्भावार्द्रः तत्कालफल-
नशीलः ॥ १८ ॥ छन्नोपान्तेति ॥ फलं भवदाश्रयदानेन भूभृतोपि क्षोभासंभावयितुमाह ॥ नूनमिति । अहं एवं मन्ये अचलः पर्वतः त्वयि शिखरं शृंगं आरू-
ढे सति अमरमिथुनैः प्रेक्षणीयां अवस्थां दर्शनीयां अवलोकनीयां अवस्थां शोभां यास्यति किंविशिष्टे त्वयि स्निग्धवेणीसवर्णे कांति [illegible] कृत्वरीस्तोमलिविभि ।
किंविशिष्टोचलः काननाम्रैः काननरूपताप्राप्तैः आम्रैः काननाम्रैः छन्नोपान्तः छादितपर्यन्तः किंविशिष्टैः काननाम्रैः । परिणतफलद्योतिभिः परि-
पाकं गतफलप्रकाशिभिः । उत्प्रेक्षते भुवः पृथिव्याः स्तन इव । कथंभूतः स्तनः मध्ये श्यामः कृष्णः अपरं किंविशिष्टः अचलः शेषविस्तारपाण्डुः तर्हि मिथु-
नमिति कथमुक्तं यतः स्त्रीणां स्तनावलोकने तथाविधकौतुकं न भवति । सत्योस्तनेकत्वे तासामपि प्रेक्षाकौतुकमुपपन्नमिति । १९ ॥ ॥ १९ ॥ ॥ १३ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मेघ टी.

॥स्थित्वा तस्मिन्निति॥ प्रशस्तवस्तुदर्शनमस्योपदिशन्नाह॥ हे जलद त्वं तस्मात् गिरेः आम्रकूटात् परं वर्त्म मार्गं तीर्णः सन् अतिक्रांतः सन् रेवां नर्म-
दां द्रक्ष्यसि किं कृत्वा मुहूर्तं तस्मिन्नाम्रकूटे स्थित्वा कथंभूते तस्मिन् वनचरवधूभुक्तकुंजे। किरातकांताोपभुक्तसुरतो विलतापिहितप्रदेशे। कथंभूत
स्त्वं तोयोत्सर्गात् जलत्यागात् द्रुततरगतिः शीघ्रतरगामिनः कथंभूतां रेवां विंध्यपादे विंध्याचलप्रत्यंतपर्वते विशीर्णां। शतशः स्फुटितां॥ किं वि
शिष्टे विंध्यपादे उपलविषमे पाषाणदंतुरे उपलैः स्यूते। गजस्य अंगे भूतिमिव। किं विशिष्टां भूतिं भक्तिच्छेदैः खंडितभक्तिप्रकारैर्विरचितां न्यस्तां॥१९॥
तस्यास्तिक्तैरिति। तोयत्यागात् अनंतरं तस्याः पथि पाथेयस्योपदेशार्थमाह॥ हे जलद मेघ त्वं तस्याः नर्मदायाः तोयं पानीयं आदाय गच्छेः यायाः
किंलक्षणं तोयं वनगजमदैः वासितं काननहस्तिदानैः सुगंधीकृतं॥ मदैः किंलक्षणैः वनगजमदैस्तिक्तैः सुरभिभिः किं विशिष्टस्त्वं वांतवृष्टिर्य
नासौ वांतवृष्टिः अपरं किंलक्षणं तोयं जंबूकुंजप्रतिहतरयं तीरजंबूलताजालप्रतिहतरयं। स्खलितवेगरहितं॥ अनिलो वायुः अंतःसारं हिय

स्थित्वा तस्मिन् वनचरवधूभुक्तकुंजे मुहूर्तं तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः॥ रेवां द्रक्ष्यस्युपलविषमे विंध्यपादे विशीर्णां भक्तिच्छेदैरिव विरचि
तां भूतिमंगे गजस्य॥१९॥ तस्यास्तिक्तैर्वनगजमदैर्वासितं वांतवृष्टिर्जंबूकुंजप्रतिहतरयं तोयमादाय गच्छेः॥ अंतःसारं घन तुलयितुं नानिलः शक्ष्यति
त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥२०॥ नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढैराविर्भूतप्रथममुकुलाः कंदलीश्चानुकच्छं॥ दग्धारण्ये
ष्वधिकसुरभिं गंधमाघ्राय चोर्व्याः सारंगास्ते जललवमुचः सूचयिष्यंति मार्गं॥२१॥

स्मात् कारणात् सर्वोपरि मध्ये जलं सत्वां तुलयितुं आंदोलयितुं न
शक्यति विना सामर्थ्यो हियस्मात् कारणात् सर्वोपि रिक्तः सन् क्षीणविभवः सन् लघुर्भवति पूर्णता विभवता गौरवाय मानताय भवति॥२०॥ नीपमिति। मार्गोपदेश
कप्रकाशनार्थमाह॥ हे जलद सारंगाश्चातकास्ते तव मार्गं सूचयिष्यंति परस्परं कथयिष्यंति। अनेन यथा प्रस्थितो धः परमस्माभिः आपहीनैः न दृष्टः
किं कृत्वा नीपं दृष्ट्वा कदंबकुसुममालोक्य। किं विशिष्टं नीपं अर्धरूढैः अर्धविकसितैः केसरैः किंजल्कैः हरितकपिशं। नीलकपिशं न केवलं नीपं दृष्ट्वा वन
स्पतिविशेषान् विलोक्य अनुकच्छं कच्छमनुलक्षीकृत्य कदलीश्च दृष्ट्वा वनस्पतिविशेषान् विलोक्य किं विशिष्टाः कंदलीः आविर्भूतप्रथममुकुलाः संजात
नूतनकोरकाः न केवलं कंदलीर्दृष्ट्वा अपरं दग्धारण्येषु दावानलहुतकानने षु उर्व्याः पृथिव्याः गंधमाघ्राय। किं विशिष्टं गंधं अधिकसुरभिं अतिशयेन
सुगंधितं। किंभूतस्त्वं जललवमुचः तोयकणवर्षिणः कैश्चित्पदितैरिति व्याख्यायते। सारं मधुरं गायंतीति ते सारंगाः भ्रमराः। सारं शोभनं गच्छंतीति सारंगाः॥

राम. ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥अंभोविंदुरिति॥ सिद्धानां प्रियसहचरीणां आलिंगनेन पयोदस्य परोपकारित्वमभिधातुमाह॥ हे जलद सिद्धाः देवविशेषाः स्तनितसमये गर्जित
काले त्वां मानयिष्यंति स्तोष्यंति। किं कृत्वा प्रियसहचरीसंभ्रमालिंगितानि वल्लभभार्यासंभ्रमालिंगितानि आसाद्य प्राप्य। किंविशिष्टानि प्रियसहचरी
संभ्रमालिंगितानि सोत्कंपानि उत्कंपसहितानि। किंविशिष्टाः सिद्धाः आतन्वीक्षमाणाः किंभूतान् चातकान् अंभोविंदवस्तेषां ग्रहणं आदानं तत्र रभसो
वेगो येषां ते अंभोविंदुग्रहणरभसाः तान्। परिगणनया बलाकाः निर्दिशंतः परिगणनया एकद्वित्र्यादिकया संख्यया बलाकाः बकपत्नीः निर्दिशंतः ग
णयंतः किंविशिष्टाः बलाकाः श्रेणीभूताः पंक्तिस्थिताः॥२२॥ उत्पश्यामीति॥ पयोदस्य रमणीयकविलोकनेन कालविलंबं निषेधयन्नाह॥ हे सखे
अहं ते तव पर्वते पर्वते कालक्षेपं कालविलंबं उत्पश्यामि संभावयामि। किंविशिष्टस्य किं कर्तुमिच्छोः तव द्रुततरं शीघ्रं मत्प्रियार्थं मत्प्रियं तदेवार्थः
अंभोविंदुग्रहणरभसान् चातकान् वीक्षमाणाः श्रेणीभूताः परिगणनया निर्दिशंतो बलाकाः॥ त्वामासाद्य स्तनितसमये मानयिष्यंति सिद्धाः सोत्
कंपानि प्रियसहचरीसंभ्रमालिंगितानि॥२२॥ उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते॥ शुक्लापांगैः
सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथमपि भवान् गंतुमाशु व्यवस्येत्॥२४॥ पांडुच्छायोपवनवृतयः केतकैः सूचिभिन्नैर्नीडारंभैर्गृह
बलिभुजामाकुलग्रामचैत्याः॥ त्वय्यासन्ने परिणतफलश्यामजंबूवनांताः संपत्स्यंते कतिपयदिनस्थायिहंसा दशार्णाः॥२५॥
प्रयोजनं यस्य तत्
मत्प्रियार्थं यियासोः गंतुकामस्यापि किंविशिष्टे पर्वते ककुभान्यर्जुनपुष्पाणि तैः सुरभिः तस्मिन् ककुभसुरभौ अर्जुनवृक्षकुसुमसुगंधिते। भवान्
त्वं कथमपि केनापि प्रकारेण आशु शीघ्रं गंतुं व्यवस्येत् व्यवसायं कुर्याः किंविशिष्टस्त्वं शुक्लापांगैः सजलनयनैः प्रमोदाश्रुपूरितनेत्रैः॥२४॥ पांडु
च्छाया इति। अथ स्वसंबंधदेशसमृद्ध्यभिधानेन मेघं भूयः प्रलोभयन्नाह॥ हे जलद त्वयि आसन्ने सति दशार्णाः देशविशेषाः एवंविधा भविष्यंति सं
पत्स्यंते। किंविशिष्टाः दशार्णाः पांडुच्छायोपवनवृतयः पांडुच्छाया अवदाता कांतिर्यासु उपवनानां नानापुष्पोद्यानानां वृतयः येषु ते। कैः केतकैः केतकीकुसुमैः किंवि
शिष्टैः केतकैः सूचिभिन्नैः मुकुलकंटकव्याप्तैः अपरं किंविशिष्टाः दशार्णाः बलिभुजां काकबकचटकादीनां गृहेषु बलिं भुंजते इति गृहबलिभुजः काकाः
अथवा गृहकलत्रं बलिभुंजते इति गृहबलिभुजो वकोटास्तेषां नीडारंभैः आलयोपक्रमैः आकुला विह्वला मलसबलाः ग्रामचैत्याः ग्रामपाद
पाः पिप्पलादयो देवतायतनानि वा येषु ते अपरं किंविशिष्टाः दशार्णाः परिणतफलैः श्यामाः कृष्णाः जंबूवनानां अंताः येषु ते॥ अपरं किंविशिष्टाः दशा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे॰ टी॰ १

तेषां दिक्षु इति॥ मार्गेण गरनदीसंभोगलाभमाह्लादिनं प्रहर्षयन्नाह॥ हे जलद त्वं तेषां दशार्णानां राजधानीं गत्वा सद्यः तत्कालमेव कामुकत्व
स्य कामिनः पुरुषस्य अविकलं परिपूर्णं फलं लब्धा लप्स्यते॥ किं लक्षणां राजधानीं॥ दिक्षु प्रथितां विख्यातां विदिशा इति लक्षणं नाम यस्याः सा
तथा॥ हे जलद त्वं तस्याः नगर्याः यात् वेत्रवत्याः नद्याः पयः पानीयं पास्यसि— प्यसि। कथं यथा भवति तीरोपान्तस्तनितसुभगं यथा भवति तटसमीपगर्जि
तसुंदरं यथा भवति॥ किं विशिष्टं पयः स्वादु। अपरं किं विशिष्टं पयः चलोर्मि चंचलवारितरंगं। उत्प्रेक्षते सभ्रूभंगं भ्रूभंगसहितं मुखमिव। अन्योपि यः किल का
मीकस्याश्रितकामिन्याः मुखं पिबति। स खलु मणितध्वनितसुखरंकं भवति॥२६॥ नीचैराख्यमिति॥ विलासवासोचितसुहृन्निकेतन विश्रामोपदेशो ना
स्यात्मप्रतिप्रकटयन्नाह॥ हे जलद तत्र तस्यां नगर्यां नीचैराख्यं नीचैरभिधानं पर्वतं अधिवसेः आश्रयेः किमर्थं विश्रामहेतोः मार्गखेदापनोदाय॥
विश्रामकारणेन। किं विशिष्टो गिरिः उत्प्रेक्षते॥ त्वत्संपर्कात् भवदीयसंयोगात् पुलकितमिव रोमांचितमिव कैः कदंबैः नीपपादपैः किं विशिष्टैः कदंबैः प्रौढ
पुष्पैः विकासितकुसुमैः साकः पर्वतः नगराणां नगरनिवासिनां नागराणां लोकानां यौवनानि प्रथयति कैः शिलावेश्मभिः उपलनिलयैः। किं विशिष्टैः

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा॥ तीरोपान्तस्तनितसुभगं पास्यसि स्वादु युक्तं सभ्रूभंगं मुखमि
व पयो वेत्रवत्याश्चलोर्मि॥२६॥ नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोस्त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पैः कदंबैः॥ यः पण्यस्त्रीरतिपरिमलोद्गारि
भिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥२७॥ विश्रांतः सन् व्रज वननदीतीरजातानि सिंचन्नुद्यानानां नवजलकणैर्यूथिकाजाल
कानि॥ गंडस्वेदापनयनरुजाक्लांतकर्णोत्पलानां छायादानात् क्षणपरिचितः पुष्पलावीमुखानां॥२८॥ ॥२८॥

शिलावेश्मभिः पण्यस्त्रीणां पण्यांगनानां
रतिषु सुरतेषु यः परिमलः सुरतसमर्दोद्भूतगंधमुद्गिरंति त्यवे शिलानि पण्यस्त्रीरतिपरिमलोद्गारीणि तैः। किं विशिष्टानि यौवनानि उद्दामानि उत्कटा
नि॥२७॥ विश्रांत इति॥ विमलाभानुविद्धमध्वमध्वानमुपदेष्टुमाह॥ हे जलद त्वं विश्रांतः सन् लब्धतोखेदापनोदः सन् व्रज गच्छ। किं कुर्वन् उद्यानानामा
रामाणां यूथिकाजालकानि मागधकुहराणि सिंचन् कैः नवजलकणैः नूतनतोयबिंदुभिः। किं विशिष्टानि वननदीतीरजातानि। मालवाख्यदेशे यूथिका
खंडमंडितोद्यानमीलिततीरा दशार्णा नवे नदी नाम्नि सरिदस्ति। किं विशिष्टस्त्वं। पुष्पलावीमुखानां मालाकारिणीवदनानां छायादानात् आतपप्रतिब
धात्॥ क्षणपरिचितः मुहूर्त्तं प्रीतियुक्तः प्रीतितत्परः किं विशिष्टानां पुष्पलावीमुखानां क्लांतकर्णोत्पलानां निम्लानं श्रवणावतंसेंदीवराणां गंडस्वेदापनया

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वक्रः पंथेति॥ विशेषविषयानुभूवः यदि तत्र न गच्छामि तर्हि मम किं विधुरं स्यात् तवैव जन्म यौवनं जीवितं च निःफलं स्यात् सिद्धयमार्गीतरनिर्देशायन्नाह॥ हे
जलद यद्यपि भवतः ते तव उत्तराशां उत्तरदिशं प्रस्थितस्य चलितस्य सतः पंथा वक्रः स्यात्। कुटिलो भवति पुनः तथापि उज्जयिन्याः सौधोत्संगप्रणयविवि
मुखो मा स्म भूः सौधानं धवलगृहाणां उत्संगो चिरकप्रदेशास्तत्र प्रणयसंबंधस्तत्र विमुखः पराङ्मुखः सौधोत्संगप्रणयविमुखः यदि त्वं तत्र न स्या उ
ज्जयिन्यां स्त्रीणां लोचनैर्न रमसे तदा त्वं वंचितोसि॥ जन्मफलवंध्यो यातीति भावः। किं विशिष्टैः लोचनैः विद्युद्दामस्फुरितचकितैः तडिल्लोल्लसित
तत्रस्थैः अपरं किं विशिष्टैः लोचनैः लोलापांगैः अनवरचकितत्वाच्चंचलनेत्रपर्यंतैः॥२६॥ वीचीक्षोभेति॥ उज्जयिनीमार्गोपदेशेनास्य

वक्रः पंथा यदपि

गाराङ्गनानां संगममाह॥ हे जलद त्वं पथि मार्गे भव। किं कृत्वा निर्विंध्यायाः संसर्पंत्याः गच्छंत्याः कथं यथा भवति। स्खलितैः संसर्पंत्याः सुभगं यथा
भवति किं विशिष्टायाः निर्विंध्यायाः वीचिक्षोभतकल्लोलसंचलनेन स्तनिता शब्दिता विहगश्रेणी खगपंक्तिरेव कांचीगुणो मेखलादाम यस्याः
सा वीचिक्षोभस्तनितविहगश्रेणीकांचीगुणा तस्याः अपरं दर्शित आवर्त्तनाभिर्यया सा दर्शितावर्त्तनाभिः तस्याः ननु तदभिप्रायमपरिज्ञाय
कथं रसाभ्यंतरप्रवेशः कर्त्तव्य इत्याह॥ हि यस्मात्कारणात् स्त्रीणां विभ्रमो विलासः प्रियेषु वल्लभेषु विषये आद्यं प्रणयिवचनं प्रार्थनावाक्यं अ
पि प्रिया किल कामिनी कस्मिंश्चित् वचनाभिलाषा भवति॥ सा त्वगतस्खलितसुभगं सर्पंति स्तनितकांचीगुणा स्यात्॥ आवर्त्त[illegible]पलक्षितानां
नाभिं च दर्शयति॥ स्त्रीणां दक्षिणावर्त्तनाभिः प्रशस्या स्यात्॥ सोपि कामी तस्याः रसाभ्यंतरं संनिपत्य उक्तिः संभोगसर्वस्वं उपभुक्तमित्यर्थः उक्तं
च॥ आकारैरिंगितैर्गत्या चेष्टया भाषणेन च॥ नेत्रवक्त्रविकारेण ज्ञायतेंतर्गतं मनः॥ स्निग्धं दृष्टिपथं विभूषति वपुर्वर्णस्य कंडूयनं केशा
नां च मुहुर्मुहुर्विचरणं वार्त्ता विसर्गो सह॥ नाभेर्दर्शनमुत्सवे च गमनं बालस्य चालिंगनं ऊर्वीरन्तू विवशास्त्रियः समहतादृष्ट्वा नरं वांछितं॥२७॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे.टी.
८

वेणीभूतेमार्गेपदेशद्वारेण पाथोदस्यवनितात्वेन अभिधीयमाननदीद्वयविरहव्यवस्थाकथनेनतत्राह॥ एतान्निरूपयन्नाह॥ हेजलदवनि
ता निर्विंध्या अतन्तस्य अतिक्रांतस्य सतः मार्गे सिंधुनाम्नी नदी विद्यते॥ किंविशिष्टा निर्विंध्यां वेणीभूतप्रतनुसलिलां॥ किं कुर्वती॥ विरहावस्थ
या विरहदेशया तेनतवसौभाग्यं व्यंजयंतिप्रकटयंति। अपरं किं तटगतजीर्णपर्णैः पांडुच्छाया अवदातकांतिः॥ किं तटगैः जीर्णपर्णैः तटरुहतरुभ्रंशिभिः
अन्यापि याविरहिणी भवति। सावशीं वंधपांडुतावधारयति हे सुभग हे कामिनां वल्लभ येन विधिना सा सिंधुः कार्श्यं त्यजति॥ कृशतां मुंचयति तत्त्वया
साविधिः त्वया उत्पाद्यः उत्पादनीयः सुहृद्युरा मुधिराधेय इत्यर्थः॥ २९॥ प्राप्यावंतीति॥ मार्गगमनक्रमेण कथनवाजेनोज्जयिन्याः स्मरणीयकविलोकना
यतेप्रवर्णयन्नाह॥ हेजलद त्वं पूर्वोद्दिष्टां प्रथमकथितां विशालां विशालेत्यपरनाम्नीमुज्जयिनीं पुरीं अनुसर आश्रय॥ किं कृत्वा अवंतीन् मालवकदेश
न् प्राप्य॥ किंविशिष्टान् अवंतीन् उदयनकथाकोविदग्रामवृद्धान्॥ वत्सराजचरित्रप्रवीणग्रामस्थविरान्॥ किंविशिष्टां पुरीं॥ श्रीविशालां श्रिया विभूत्या
विशालां उस्रेहतेस्वर्गिणां शेषैः पुण्यैः स्वर्गोपभोगादवशिष्टसुकृतैः दिवः स्वर्गस्य कांतिमत् शोभायुक्तं एकं खंडं उद्धृतमिव आनीतमिव क

सतिसुचरितफलश्रेयःकर्मणोपार्जितस्वर्गोपलक्षणे स्वल्पीभूते सति। उपभोगात् अपचीयमाने सति। ३०॥ आदौ दीर्घीकुर्वन्निति॥ उज्जयिन्याविलासीवा
लोचितत्वं सूचयन्नाह॥ हेजलद यत्र यस्यां नगर्याम् उज्जयिन्यां शिप्रावातः स्त्रीणां सुरतग्लानिं हरति सुरतसंभोगं अपनयति॥ प्रत्यूषे प्रभातेषु किं कुर्व
न् सन् सारसानां कूजितं दीर्घीकुर्वन् विस्तारयन्॥ किं विशिष्टं कूजितं पटुमदकलं प्रकटं। अपरं किं भूतं कूजितं मदेन कलं मधुरं मदकलं॥ अथवा पटुम
दकलं किंविशिष्टः शिप्रावातः स्फुटितकमलामोदमैत्रीसहायः स्फुटितानि विकसितानि यानि कमलानि तेषां आमोदः परिमलः तस्य मैत्रीतया कषायः
मनोहरः तत्॥ विकसितकमलपरिमलसंबंधसुरभिः॥ किंविशिष्टः शिप्रावातः अंगानुकूलः स्पर्शसुखदः उपमीयते प्रियतम इव वल्लभ इव प्रियतमो विप्र

राम:
८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दुःखं मे [illegible]हा। किंभूतः प्रियतमः अंगानुकूलः पटुपरिकादानसंवादनेन प्रियायाः शरीरावयवे सुखप्रदः किं कुर्वन् सरसानां स्त्रीणां संहरत्वेन शृंगारेण वर्त्ते
न इति सारसाः क्रियः तासां सारसानां स्त्रीणां कूजितं रतिकूजितं दीर्घीकुर्वन् किंभूतं रतिकूजितं पटु स्पष्टं किंभूतं कूजितं मदकलं मधुरं। कथंभूतः प्रियतमः।
स्फुटितकमलामोदमैत्रीकषायः विकसितकमलवत् आमोदः तस्य मैत्री संपर्कः तेन कषायः सुरभिः के पुष्पसूवे पुष्पमानेषु पटुमदकलकूजितं विविधवि
लेपनामोदसंपर्कैः सुरभिः सुभगत्वात् स्पर्शसुखदस्त्रीणां सुरतग्लानिं हरति। पुनरपि सुरते धनं नयतीत्यर्थः।। किंविशिष्टः प्रियतमः प्रार्थनाविषये चाटूनि
करोतीति प्रार्थनाचाटुकारः निजगाद सा पटुनंदनेनेति।। ३३।। हारांस्तारान्।। नगरीरमणीयकं दर्शयन्नाह।। हे जलद सलिलनिधयः समुद्रास्तोयमात्राव
शेषाः संलक्ष्यंते ज्ञायंते तोयमात्रं अवशिष्टं येषु। किं कृत्वा यस्यां नगर्यां एतान् पदार्थान् दृष्ट्वा विलोक्य एतान् कान् इत्याह। हारान् दृष्ट्वा किंविशिष्टान् हा

रान् तारान् उत्कटान्। अपरं किंविशिष्टान् हारान् तरलगुलिकान्। तरला नायकमणय एव गुटिका येषु ते तरलगुलिकाः हारमध्यस्थिते रत्ननायकं त
रलं विदुः तान् अनेकेवले हारान् दृष्ट्वा अपरं कोटिशः कोटिसंख्याः शंखशुक्तीः दृष्ट्वा अपरं मरकतमणीन् दृष्ट्वा किंविशिष्टान् मरकतमणीन् शष्पश्या
मान् बालतृणवत् श्यामलान्। अपरं किंविशिष्टान् उन्मयूखप्ररोहान् उत्कृष्टकिरणांकुरान्। नकेवलं मरकतमणी
न् दृष्ट्वा अपरं विद्रुममणीं प्रवालानां भंगान् दृष्ट्वा शकलानवलोक्य। किंविशिष्टान् भंगान्। विपणिरचितान्। हट्टश्रेणीप्रसारितान् सर्वे वा माव
शेषाः सलिलतामेव निधयो नतु रत्नानामिति वितर्कालंकारः।। ३४।। प्रद्योतस्येति।। पुनरपि नगरीरमणीयत्वं दर्शयन्नाह।। हे जलद आपूर्णकान्
यत्र यस्यां नगर्यां जनो लोकः आगतून् बंधून् स्वजनान् इति अमुना प्रकारेण रमयति इति किं अत्र अस्मिन् स्थाने वत्सराजः प्रद्योतस्य राज्ञः प्रियदुहितरं जह्रे अ
त्रास्मिन्स्थाने तस्यैव राज्ञः हेमं तालद्रुमवनम् अभूत् अत्र किल इति श्रूयते। नलगिरिः नाम हस्ती दर्पात् मदात् स्तंभम् उत्पाट्य उद्भ्रांतः भ्रमितः। किंविशिष्टः अभितः

सुवर्णमयं

इति

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे मे.टी. ५

कुशल ॥३५॥ जालोद्गीर्णैरिति ॥ भर्तुः कंठच्छविरिति युग्मं वक्ष्यमाणयुक्तबालककामोपभोगलाभेन प्रलोभयन्नाह ॥ हे जलद त्वं त्रिभुवनगुरोश्चंडीश्वरस्य
भवानीपतेः श्रीमहादेवस्य धाम मया याः गृहं गच्छेः अस्याः उज्जयिन्याः हर्म्येषु धवलगृहेषु खेदं नीत्वा ॥ आमं निर्गत्य ॥ किंविशिष्टस्त्वं ॥ केशसंस्कारधूपैः केशा
नां चोरजन्म मूर्द्धजानां संस्कारस्तदर्थं धूमाः तैः उपचारणं ॥ कबरीकलाधिवासनधूपधूपैरुपचितवपुः वर्द्धितशरीरः ॥ किंविशिष्टैः केशसंस्कारधूपैः जा
लोद्गीर्णैः गवाक्षनिर्गतैः अपरं किंविशिष्टस्त्वं भुवनशिखिभिः क्रीडामयूरैः दत्तनृत्योपहारः दत्तः नृत्यमेव उपहारः इज्जोपहारो यस्मै सः कया बंधुप्रीत्या सु
हृत्स्नेहेन किंविशिष्टेषु हर्म्येषु कुसुमसुरभिषु पुष्पसुगंधिषु अपरं किंविशिष्टेषु हर्म्येषु ललितास्वच्छया विहारवनितायाः वनितानां यकां तासां चरणैः चर
णालक्तकैः रंकितानि चिह्नितानि ललितवनितापादरागांकितानि तेषु । अपरं किंविशिष्टस्त्वं अध्वखिन्नांतरात्मा अध्वना मार्गेण खिन्नः अंतरात्मा यस्य
सः अपरं किंविशिष्टस्त्वं स्वगणैः इति कारणात्सादरं वीक्ष्यमाणः इति किं यतः कारणात्भर्तुः कंठच्छविरिति ॥ किंविशिष्टं धाम पुण्यं पवित्रं अपरं किंविशिष्टं

पाद

३६

धृत

धाम गंधवत्याः नद्याः मरुद्भिः धूतोद्यानं कंपितसमीपवनं । किंविशिष्टैर्मरुद्भिः कुवलयरजोगंधिभिः कुवलयानामुत्पलसंबंधिनां यो मकरंदरेणुस्तेनांग
धो येषां ते अपरं किंविशिष्टैः मरुद्भिः तोयक्रीयानिरतयुवतिस्नानतिक्तैः जलक्रीडासक्तपौरवनितासेविता मोदिभिः । युग्मं ॥३७॥ अप्यन्यस्मिन्निति ॥ वसिष्ठादव
दर्शनेनास्य श्रेयः सिद्धिमभिधातुमाह ॥ हे जलद हे मेघ यावत्भानुः श्रीसूर्यः नयनविषयं अभ्येति तावत्त्वयास्थातव्यं किं कृत्य महाकालं शिवं आसाद्य
प्राप्य हे जलद त्वं आमंद्रागंभीराणां गर्जितानां अविकलं सकलं फलं प्राप्स्यसि ॥ गीतवाद्यानां मम न पुण्यहेतुत्वात् ॥ किं कुर्वन्सन् शूलिनः महेश्व
रस्य संध्याबलिपटहतां कुर्वन् ॥ पटहतां वाद्धिनीत्व ... संहतिं विस्तारयन्सन् ॥ किंविशिष्टां संध्याबलिपटहतां श्लाघनीयां रोचनीयां ॥ ३८ ॥ पादन्या
समिति ॥ दृष्टादृष्टफलमभिधातुमाह ॥ ... लद तत्र तस्मिन्महाकालभवने वेश्याः त्वयि विषये करात्तान् आमोदंते किं कृत्वा ॥ तत्तः वर्षाग्रबिंदून्प्र

नोनेर्षाः

अन्यस्मिन्
पिकालेद्य
सां तरेवि

रामः

६

२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

... यनगोचरो भवति ।

अपरं किं कुर्वन् संध्यासंध्याकालीनं तेजः दधानः । किंविशिष्टं तेजः । के विसितं पुष्पितं

यम जलकणान् प्राप्य ॥ किंल क्षणान् वर्षाग्रविंदून् नखपदसुखान् सुखयंतीति सुखाः नखपदानां सुखाः नखपदसुखास्तान् ॥ किंविशिष्टाः वेश्याः
पादन्यासक्कणितरसनाः पादन्यासेन क्कणिताः शब्दिता रसनाः मेखलाः यासां ताः अपरं किंविशिष्टाः वेश्याः चामरैः लोलहस्ताः अतिहस्ताः
किंविशिष्टैः चामरैः लीलावधूतैः अपरं किंविशिष्टैः चामरैः रत्नानां छायया खचितानि संबंधवंति रत्नछाया खचितवल
नतैः वलिरुपदंडैरिति ॥ कथंभूतान् कटाक्षान् मधुकरश्रेणीदीर्घान् भ्रमरपंक्त्यादीर्घान् ॥ ३५ ॥ पश्चादुच्चैरिति ॥ चंडीपतितांडवोपकरणत्वेन पा
पोदस्यशोभां संभावयन् नाह ॥ हे जलद त्वं पश्चात् भवानीपतेर्नर्तनगमनादनंतरं पशुपतेर्महेश्वरस्य नृत्यारंभे आर्द्रनागाजिनेच्छां कीलाललक्तिलक
रिकल्लिकारणात् प्रपतयः किंविशिष्टः सन् उच्चैः भुजतरुवनं उन्नतभुजमेव तरवस्तेषां वनं संहतिः भुजतरुवनं मंडलेन मंडलाकारेण अभिलीनः
सन् आश्रितः सन् ॥ अपरं किंविशिष्टः त्वं भवान्याः पार्वत्याः दृष्टभक्तिः दृष्टा विलोकिता भक्तिः सेवा यस्य सः कथं यथा भवति यथा ॥ शांतोद्वेगस्ति

मितनयनं यथा भवति शांतमुपशमयतीति सः उद्वेगस्तेन स्तिमिते निश्चले नयने यत्र दर्शने तत् ॥ रुधिराईतावि लगजाजिनावलोकनेन प्रतिदिवसं तस्याः
उद्वेगः समुत्पद्यते ॥ स च त्वयि गजाजिनत्वेन शांतस्ततः एवस्तिमितनयनां अतएव दृष्टभक्तिः ॥ ३९ ॥ गच्छंतीनामिति ॥ परोपकारित्वेन प्रोत्साहय
न्नाह ॥ हे जलद त्वं यत्र यस्यां उज्जयिन्यां नक्तं रात्रौ योषितां नायकानां उर्वीदृष्टीं दर्शयाकयासौ दामिन्या विद्युता ॥ किं कुर्वतीनां योषितां रमणवसतिं गच्छ
तीनां वल्लभवसतिं यांतीनां ॥ क्व सति नरपतिपथे राजमार्गे रुद्धालोके सति निबिडदृष्टप्रसारे सति कैः तमोभिः ॥ किंविशिष्टैः तमोभिः सूचिभिः मेद्यावि
तैः वहुलैः तमसां अतिनिविडत्वात् ॥ किंविशिष्टया सौदामिन्या कनकनिकषस्निग्धया सुवर्णपरितोपलवत् स्निग्धया तेजस्विन्या ॥ निकषोपल
परिस्फुरत्कांचनरेखामनोज्ञया हे जलद त्वं तोयोत्सर्गात् उदकत्यागात् स्तनितमुखरो मास्म भूः दृष्टैः गर्जितामंतरसांगमनयाधातोनकर्त्तव्यादृतिभावः
तो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तां कस्यांचिदिति॥ लब्धकामोपभोगः गमनेनेतं प्रवर्त्तयन्नाह॥ हे जलद भवान् त्वं सूर्येदृष्टे सति पुनरपि रात्रिं वाहयेत् समापयेत्॥ किं कृत्वा। तां कस्यांचिद्भव
नवलभौ गृहोपरितनभूमौ नीत्वा सर्व्वां रमणीयत्वात्॥ किंविशिष्टायां कस्यांचित् भवनवलभौ सुप्तपारावतायां सुप्ताः पारावताः कपोताः यस्यां सा तस्यां
भोगिनां सुभवने पुकूजितध्वनिना सुवादितः पारावती संभवति चेत स्वभावलब्धाभिः कामिनी कंठकूजितेन जायते॥ किंभूतस्त्वं चिरविलसनात् बहुका
लक्रीडनात् खिन्नविद्युत्कलत्रः खिन्ना विद्युतेव कलत्रं यस्य सः खलु यत्कारणात् खलु इति निश्चयेन सुहृदां मित्राणां अंगीकृतार्थकृत्याः कार्याः अभ्युपे
तेऽङ्गीकृतेऽर्थे प्रयोजने येषां ते॥ पुरुषा नमंदायंते। आलस्यं भजंते येनेति निमित्ते कार्यं मया कर्त्तव्यमिति अंगीकृतं भवति स खलु मंदायते। आलस्यं भ
जंते इति भावः॥४१॥ तस्मिन्निति। सोत्कंठेनास्पृहितोपदेशमुद्देशमाह॥ हे जलद त्वं अतः कारणात् अभ्युशीघ्रं भानोः सूर्यस्य वर्त्म मार्गं त्यज। यतः कार

णात् तस्मिन्काले सूर्योदयसमये प्रणयिभिः वल्लभैः योषितां नायकानां नयनसलिलं लोचनाश्रु शांतिं नेयं कथंभूतानां योषितां खंडितानां
रात्रौ पतिरहितानां। उक्तं च॥ निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रितांगः॥ यस्याः कुतोपि गृहमेति पतिः प्रभाते सा खंडिते
ति कथिता कविभिः पुराणैः॥१॥ सोपि त्वयि कररुद्धे सति करावरोधकास्यति॥ अनल्पाभ्यसूयः स्यात्॥ प्रचंडकोपयुक्तो भवेत्॥ किंविशिष्टः सोपि
सूर्यः नलिन्याः कमलिन्याः कमलवदनात् कमलमेव नयनं प्रालेयास्रं तुषारलेयमवश्यायजलं तदेव अश्रु हर्तुं प्रत्यावृत्तः प्रत्यागतः यथा
हिमकमलानां दाहकारितया अश्रुलोचनमित्यर्थः॥४२॥ गंभीराया इति॥ अमोघरस्य नवीनवारांगनासंगमेन साफल्यं निरूपयन्नाह॥ हे जल
द गंभीरायाः सरितो नद्याः पयसि पानीये तेत्व छायात्मापि छायाप्रतिबिंबरूप आत्मापि प्रवेशं लप्स्यते प्राप्स्यति। किंविशिष्टः छायात्मा प्रकृति
सुभगः स्वभावसुंदरः कस्मिन्निव चेतसीव यथा चेतसि कस्याश्चित् गांभीर्यगुणशालिन्याः मानिन्याः कामिन्याश्चेतसि कस्यचित्प्रकृतिसुभगस्य पुरु
षस्य छायात्मा परिपाद्य लग्नगतमधिरूपप्रवेशं लभते॥ परोक्षे पितदनुकारिणी भवतीत्यर्थः॥ किंविशिष्टे चेतसि प्रसन्ने निर्मले। तस्मात्कारणात् हे ज

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लर् अस्याः गंभीरायाश्चटुलसफरोद्वर्त्तनप्रेक्षितानि कुमुदविशदानि कैः स्ववर्णनिर्मलानि चटुलाश्च चलाः शफरा मत्स्यास्तेषां उद्वर्त्तनानि तान्येव प्रेक्षि
तानि मोघीकर्त्तुं सफलीकर्त्तुं नार्हसि न योग्यो भवसि ॥४३॥ तस्याइति ॥ सिंधुवधूसमागमसक्तोंबुधैर्यात् धारत्वात् विलंबकथनार्थमाह ॥ हे सखे हे मित्र
ते तव प्रस्थानं गमनं कथमपि महता कष्टेन भाविष्यं भविष्यति ॥ किं कृत्वा गंभीरायाः पयसि सलिलवसनं पानीयमेव वसनं हृत्वा ॥ किंविशिष्टं सलिलवस
नं नीलं यथा यमुनाजलं श्यामं तथा इदं दृष्ट्वा ॥ भाविकः कश्चित्पुरुषः निजां प्रियां प्रति पादयतः कर धृते सति अनत्याप्यस्य यो भवति ॥ कस्मात् धैर्यात्
काठिन्यलक्षणात् नीलं ॥ अपरं किंविशिष्टं सलिलवसनं मुक्तरोधोनितंबं मुक्तो रोध एव तीरमेव नितंबो येन ॥ अपरं किंविशिष्टं सलिलवसनं प्राप्तवानीर
शाखं प्राप्ता वानीराणां हस्ताणां शाखा येन तत् प्राप्तवानीरशाखं ॥ किंविशिष्टस्य तव लंबमानस्य उपरि वर्त्तमानस्य ॥ जलभरेत्वात् दोलमानस्य ॥ कः ज्ञा
तास्वादः पुरुषः हे वितजघनां विपुलिजघनां विवृतजघनेयस्याः सा तां स्त्रियं विधातुं त्यक्तुं समर्थः अपितु न कोपि समर्थः ॥४४॥ त्वन्निस्यंदोच्छ्वसितेति ॥

हे जलद ते तुभ्यं वायुः नीचैः वास्यति सेविष्यति ॥ किंभूतः वायुः शीतः किंभूतस्य ते देवपूर्वं गिरिं उपजिगमिषोः उपयियासोः ॥ अपरं किंभूतः वायुः त्वन्नि
ष्यंदोच्छ्वसितवसुधागंधसंपर्करम्यः ॥ तव निष्यंदो जलकणस्रवणं तेन उच्छ्वसिता विकसिता या वसुधा तस्याः गंधसंपर्कः परिमलपरिचयः तेन रम्यः भव
ज्ञोलाशायमुल्लसितभूमिपरिमलसंबंधसुभगो यथा भवति ॥ श्रोतरंध्रियः तच्चेह अस्तावात् घ्राणसुगंधदंडस्तस्य रंध्रस्तस्य ध्वनितः फूत्कारस्तेन सुभ
गः मनोज्ञः ॥ अत एव सुभगत्वात् दंतिभिः हस्तिभिः पीयमानः कथं यथा भवति ॥ स्रोतोरंध्रध्वनितसुभगः अपरं किंविशिष्टो वायुः काननोदुंबराणां फ
लानां परिणमयिता पाकयिता ॥४५॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे.टी.
११

तत्र स्कंदमिति॥ वारिवाहस्य वसतिं देवतापरिपूजया इष्टैः फलप्राप्त्यार्थमाह॥ हे जलद भवान् त्वं तत्र तस्मिन् देवगिरौ स्कंदं कार्तिकेयं पुष्पासारैः पुष्पा
णामासारो वेगो र्वृष्टयस्तैः स्नपयतु अभिषिंचेत्॥ किंविशिष्टः स्कंदं नियतवसतिं॥ किंविशिष्टस्त्वं पुष्पमेघीकृतात्मा कामरूपत्वात् पुष्पाणां मेघीकृ
तः आत्मा येनासौ किंविशिष्टैः पुष्पासारैः व्योमगंगाजलार्द्रैः गगनमंदाकिनीपयस्क्लिन्नैः कस्मादयमुपास्य इति॥ तन्मात्रसु -- यन्नाह॥ हि
यस्मात्कारणात्॥ हे जलद नवशशिभृता महेश्वरेण तत्तेजोराशिमंडलवत् हुतवहमुखे वैश्वानरमुखे संभृतं निक्षिप्तं॥ किमर्थं वासवीनां चमूनां
ऐंद्रीणां सेनानां रक्षाहेतोः रक्षार्थं किंभूतं तेजः अत्यादित्यमिति कांतं॥ आदित्यादपि सातिशयमित्यर्थः॥४६॥ ज्योतिर्लेखा इति॥ वायो
दमग्निसुतात् प्रसादलाभसंभावनया प्रोत्साहयन्नाह॥ हे जलद पश्चात्पावकेरग्निजन्मनः कार्तिकेयस्य तं वाहनं मयूरं गर्जितैः नर्तयेथाः॥

तत्र स्कंदं नियतवसतिं पुष्पमेघीकृतात्मा पुष्पासारैः स्नपयतु भवान् व्योमगंगाजलार्द्रैः रक्षाहेतोर्नवशशिभृता वासवीनां चमूनामत्यादित्यं हुतवहमुखे
संभृतं तद्धि तेजः॥४७॥ ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति॥ धौतापांगं हरशशिरुचा पावकेस्तं मयूरं पश्चा
दद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः॥४८॥ आराध्यैनं शरवणभवं देवमुल्लंघिताध्वा सिद्धद्वंद्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः॥ व्यालंबेथाः सुरभितनन
यालंभजां मानयिष्यन् स्रोतोमूर्त्या भुवि परिणतां रंतिदेवस्य कीर्तिं॥४९॥ ॥४६॥

किंविशिष्टैः गर्जितैः अद्रिग्रहणगुरुभिः देवगिरिजनितशब्दस्पष्टैः हे जलद भवानी पार्वती यस्य मयूरस्य बर्हं पिच्छं कर्णे करोति धारयति॥ केन पुत्रप्रेम्णा
मत्पुत्रस्यायं क्रीडापात्रमिति स्नेहेन॥ किंविशिष्टं बर्हं ज्योतिर्लेखावलयि तेजोराशिमंडलवत्॥ अपरं किंविशिष्टं बर्हं गलितं स्वभावच्युतं न तु त्रोटितमित्य
र्थः॥ अपरं किंविशिष्टं बर्हं कुवलयदलप्रापि सादृश्येन कुवलयदलानुकारि॥ किंविशिष्टं मयूरं हरशशिरुचा माहेश्वरशिरसि यश्चंद्रस्तस्य रुचा दीप्त्या
धौतापांगं धौतौ विशेषेण शुक्लीकृतावपांगौ यस्य सः तं मयूरेण स्वभावेनैव शुक्लापांगत्वात्॥४७॥ आराध्येति॥ अयो विशेषाविनमेन पश्चित्प्रमादय
न्नाह॥ हे जलद त्वमेनं शरवणभवं देवं स्वामिकार्तिकेयं आराध्य व्यालंबेथाः विलंबं कुर्याः॥ किंविशिष्टः त्वं सिद्धद्वंद्वैः वीणिभिः वीणा विद्यते येषां तैः वी
णिनः तैः वीणिभिरित्यर्थः वीणापाणिभिः जलकणभयात् मुक्तमार्गः॥ किं कृत्वा तदनंतरं रंतिदेवस्य नाम्नः राज्ञः कीर्तिं मानयिष्यन् किंभूतां कीर्तिं स्रोतोमूर्त्या
नदीरूपेण भुवि परिणतां पृथिव्यामागतां॥ पुनः किंभूतां कीर्तिं सुरभितनयालंभजां सुरभितनयाः गावस्तासां आलंभे मृ क्रतुयज्ञे पुं तत्र सर्वको व्यापादः तस्मात्
किंभूतः त्वं उल्लंघिताध्वा उल्लंघितेलंघनकृतं अध्वा मार्गो येन सः पुनः ३



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्वय्यीति॥ अंभोधरस्य मिनवभूषानाभासमावनयाभिप्रवक्ताह॥ हे जलद गगनगतयो देवाः तस्याः सिंधोः चर्मण्वत्याः प्रवाहं प्रेक्षिष्यंते अवलोकयिष्यंते॥ कस
ति त्वयि जलमादातुं अवनते सति नम्रीभूते सति॥ किंभूते त्वयि शार्ङ्गिणो वर्णचौरे नारायणस्य वर्णचौरे वर्णानुकारिणि॥ किं कृत्वा दूरं अतिशयेन दृष्टीः आ
वर्ज्य नामयित्वा॥ किंविशिष्टं प्रवाहं दूरभावात् दूरदेशावस्थानात् पृथुमपि विस्तीर्णमपि तनुं तनुत्वेनावभासमानं। उत्प्रेक्ष्यते। भुवः पृथिव्याः एकं उत्कृष्टं मुक्ता
गुणमिव। किंविशिष्टं मुक्तागुणं स्थूलमध्येंद्रनीलं स्थूलं महत् मध्ये इंद्रनीलं नीलं द्युतिर्यस्य सतं॥४८॥ तामिति॥ दशपुरगमनेन विलोकनेन कुतूहलं शिवतुरेतरु
णीलोचनागोचरकारितया अंभोधरस्य सुभगतां तिकमानमारोपयन्नाह॥ हे जलद त्वं तां चर्मण्वतीं उत्तीर्य व्रज अतिक्रम्य गच्छ॥ किं कुर्वन् दशपुरवधूनेत्रकौतूह
लानां दशपुराभिधाननगरस्य नारीणां कौतुकजननैः नयननिरीक्षितानां आत्मपात्री कुर्वन्॥ विषयतां प्रापयन्॥ किंभूतानां दशपुरवधूनेत्रकौतूह
लानां परिचितभ्रूलताविभ्रमाणां परिचिताः अभ्यस्ताः [illegible] भ्रूलतानां विभ्रमाः विलासाः यैः [illegible] तेषां। उपरिष्टात् विलसंतीः स्फुरंतीः कृष्णसाराणां प्रभाः येषां
तेषां॥ अपरं किंविशिष्टानां दशपुरवधूनेत्रकौतूहलानां पक्ष्मोत्क्षेपात् कुंददलोपानुगमधुकरश्रीमुषां॥ कुंदं कुसुमं प्रेरणा [illegible] अनुयायि। भ्रमरशोभानुकारिणां प॰

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे तस्याः सिंधोः पृथुमपि तनुं दूरभावात्प्रवाहं॥ प्रेक्षिष्यंते गगनगतयो दूरमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थू
लमध्येंद्रनीलं॥४८॥ तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणां॥ कुंदक्षेपानुगमधुकरश्रीमुषामात्मबिंबं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानां॥५॥ ब्रह्मावर्तं जनपदमधः छायया गाहमानः क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः॥ राजन्यानां शितश
रशतैर्यत्र गांडीवधन्वा धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि॥५१॥

ब्रह्मावर्तमिति॥ पयोमुचः पवित्रदेशस्पर्शीनाश्रयो लाभ उपदिशन्नाह॥ हे जलद त्वं कौरवं क्षेत्रं भजेथाः आश्रयेथाः॥ किं कुर्वाणः ब्रह्मावर्तं जनपदं ब्रह्मावर्ताख्यं
जनपदं देशं छायया प्रतिबिंबेन गाहमानः व्याप्नुवान्। कथंभूतं ब्रह्मावर्तं अधः कुरुक्षेत्रस्याधोभागे वर्तमानमित्यर्थः॥ किंभूतं क्षेत्रं क्षत्रप्रधनपिशुनं क्षत्रियाणां प्र
धनमायोधनं तस्यापिशुनं ज्ञापकम्॥ संप्रत्यपि तत्र संग्रामाभिताभिलक्षितमिति भावः। यत्र यस्मिन् कुरुक्षेत्रे गांडीवधन्वा अर्जुनः शितशरशतैः तीक्ष्णबाण
सहस्रैः राजन्यानां सुराजसमूहानां मुखानि अभ्यवर्षत्॥ क इव त्वमिव यथा त्वं धारापातैः कमलानि अभ्यवर्षसि। एतावता तत्र तथा दृष्टिः कर्तव्या यथा त
न्निवासिनः पार्थशरप्रसरमनुसरंतीति व्यज्यते॥५१॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे. टी. १२

हित्वा हालामिति ॥ अंभोधरस्य धर्मसिद्धितीर्थप्रस्थानं कथयन्नाह ॥ हे सौम्य त्वमपि अन्तः शुद्धो भविता ॥ भविष्यति ॥ किं कृत्वा तासां सरस्वतीनां सरस्व-
तीसंबंधिनीनां अपां पानीयानां अभिगमं कृत्वा संगमं विधाय ॥ किंविशिष्टः त्वं वर्णमात्रेण कृष्णः ॥ अत्र सौम्यपदेन सौम्यः सन् तीर्थसेवाफलं लभत इति सौ-
म्येन च त्वया भाव्यमिति भावः ॥ उक्तं च यस्य हस्तौ च पादौ च मनश्चैव सुसंयतः विद्या तपश्च कीर्तिश्च स तीर्थसेवाफलं लभत इति सौम्येन च त्वया भाव्य-
मिति भावः ॥ उक्तं च तासां कासामित्याह … ज्ञा ॥ या अपः लाङ्गली बलभद्रः सिषेवे ॥ भेजे किं कृत्वा हालां हित्वा मदिरां त्यक्त्वा किंभूतां हालां अभिमतर-
सां अभिमतः स्वादः रसो यस्याः सा तां ॥ पुनः किंभूतां हालां रेवतीलोचनांकां ॥ सहपानाद्रेवतीलोचनप्रतिबिंबसंभवां ॥ किंविशिष्टः लाङ्गली समरविमु-
खः अथ रस्य नाम्नः सुसंग्रामपराङ्मुखः कया बंधुप्रीत्या ॥ बांधवस्नेहेन पांडवकौरवाणां द्वयेपि मम बांधवाः ते यां कं तमे योधनीयाः कतमेन इति ॥

हित्वा हालामभिमतरसां रेवतीलोचनांकां बंधुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ॥ कृत्वा तासामभिगमम अपां सौम्य सारस्वतीनामंतः शु-
द्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥५३॥ तस्माद्गच्छेरनु कनखलं शैलराजावतीर्णां जह्नोः कन्यां सगरतनयस्वर्गसोपानपंक्तिं ॥ गौरीवक्त्रभ्रू-
कुटिरचनां या विहस्येव फेनैः शंभोः केशग्रहणमकरोदिंदुलग्नोर्मिहस्ता ॥५४॥

चित्यसंजातविवाहः सरस्वतीतीर्थयात्रामनुसृत इति भावः ॥५३॥ तस्मादिति ॥ नोवदस्य त्रिदशापगमागमनेन आगम्यप्राप्तिप्रकारं कथयन्नाह ॥ हे जलद त्वं तस्मा-
त्सरस्वतीवसतो कुरुक्षेत्रात् ॥ अनुकनखलं कनखलाभिधाने तीर्थे अनुलक्षीकृत्य जह्नोः कन्यां गंगां गच्छेः यायाः ॥ किंविशिष्टां जह्नोः कन्यां शैलराजावती-
र्णां हिमाचलादवतीर्णां ॥ अपरं किंविशिष्टां गंगां सगरतनयस्वर्गसोपानपंक्तिं ॥ सगरस्य राज्ञः पत्निसहस्राणां तनयानां स्वर्गारोहणनिःश्रेणीः ॥ ते ह किल
कपिलकोपानलैः निधनीकृतमूर्तयः पाताले भस्मसात्संपन्नाः ततो भागीरथप्रसन्ने त्रिपथगापूरं प्लाविताः त्रिदिवमारुरुहुः ॥ या गंगा शंभोर्महेश्वर-
स्य केशग्रहणमकरोत् ॥ किं कृत्वा उत्क्षेप्य [illegible] गौरीवक्त्रभ्रूकुटिरचनां फेनैर्विहस्येव ॥ किंविशिष्टां गंगां इंदुलग्नोर्मिहस्तां ॥ इंदौ चंद्रमसि लग्नोर्मय एव ह-
स्ताः यस्याः सा ॥५४॥ ॥५४॥ ॥५४॥ ५४॥ ५४॥ ५४॥ ५४॥ ॥

राम: १२

तस्याः पातुमिति ॥ भागीरथीप्रस्थानगमने पाद्यादंभः पवित्रं शोभालापंक्तो साह यन्नाह ॥ हे जलद यत्त्व(य)स्मिं(दि) त्वं तस्याः गंगायाः अंभः पानीयं पातुं न कचन अभि
लषेः कथंभूतोऽसि आकाशे । किं विशिष्टः त्वं पूर्वार्द्धलंबी पश्चार्द्धेन अग्रभागेन लंबते । कइव । सुरगज इव यथा सुरगजः ऐरावतः तस्याः गंगायाः अंभः पानीयं पातुं
अभिलखति सुरगजोऽपि पूर्वकायेनावलंब्य तज्जलं पिबति ॥ अच्छस्फटिकविशदं उज्वल स्फटिकमणिवन्निर्मलं । किं विशिष्टं अंभः तिर्यक्कृतिरश्मी
नवहतः । ततः सा गंगा अभिरामा स्यात् मनोज्ञा भवेत् । कया भवतस्तव छायया प्रतिबिंबेन । कथंभूतया छायया स्रोतसि प्रवाहे सपदि तत्कालमेव संसर्पं
सा ॥ किं विशिष्टा सा उत्प्रेक्ष्यते । अस्थानोपगतयमुनासंगमेव प्रयागतीर्थव्यतिरिक्तप्रदेशे संजातयमुनाप्रयागेव ॥ ५४ ॥ आसीनानामिति ॥ वारिवाह हि

माचलरोहणार्थं सरणिः श्रमापनोदाय देशेन प्रमोदयन्नाह ॥ हे जलद त्वं तस्याः गंभीरायाः प्रभवं उत्पत्तिस्थानं अचलं हिमाचलं प्राप्य ॥ तस्य हिमाचलस्य
शृंगे शिखरे निखिन्नः सन् उपविष्टः सन् शोभां वक्ष्यसि धारयिष्यसि ॥ किं विशिष्टां शोभां शुभ्रत्रिनयनवृषोत्खातपंकोपमेयां शुभ्रो धवलो यस्त्रिनयन
वृषो महेश्वरवृषभस्तेनोत्खातो यः पंकः कर्दमः तदुपमेयां तत्सदृशां ॥ किं विशिष्टं अचलं मृगाणां नाभिगंधैः हरिणानां कस्तूरिकापरिमलैः सुरभितशिलं
आमोदितदृषदं । किं विशिष्टानां मृगाणां आसीनानां उपविष्टानां ॥ अचलं तुषारैः गौरं हिमैः धवलं । किं विशिष्टे शृंगे अध्वश्रमविनयने सुरभिशिशिर
त्वात् मार्गखेदापनोदिनि ॥ ५६ ॥ तमिति ॥ अंबुवाहं महापुरुषत्वेन परपीडानिषेधनेन प्रवर्त्तयितुमाह ॥ हे जलद त्वं चेत् यदि दावाग्निः दावानलः तं हि
माचलं बाधते पीडते ॥ क सति वायौ वहति सति ॥ किं विशिष्टो दवाग्निः सरलस्कंधसंघट्टजन्मा सरलाः वृक्षविशेषाः तेषां संघट्टः परस्परसंघर्षः त
स्मात् जन्म यस्य सः । अपरं किं विशिष्टो दवाग्निः उल्काभिः अग्निच्छटाभिः क्षिपतः दग्धं नीतः चमरीणां वालकेशसंचयो येन सः । ततः त्वं एनं पर्वतं
वारिधारासहस्रैः अलं अत्यर्थं शमयितुं अर्हसि योग्यो भवसि ॥ हि यस्मात्कारणात् उत्तमानां संपदो विभूतयः आपन्नार्त्तिप्रशमनफलाः आपन्ना-
नां आपद्गतानां यो आर्त्तिः पीडा तस्याः प्रशमनं तदेव फलं यासां ताः ॥ ५७ ॥

किंभूत

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

येइति॥ अध्वश्रमविनाशं विधाय अगमंगाभिधानेनांभोधरं संबोधयन्नाह॥ हे जलद तस्मिन्पर्वते हिमाचले ये सरभाः अष्टापदजीवविशेषाः भवंतं त्वां मुक्त
ध्वानेन उज्झितगर्जितं संतं सपदि लंघयेयुः ध्वानश्रवणजितमन्युत्वेन मन्त्रां कयात तत्कालमेवातिक्रमयेयुः किंविशिष्टाः सरभाः संरंभोत्पतनरभसाः संरंभेण मदोद्रे
केणयदुत्पतनं उत्प्लवनं तत्र रभसो वेगो येषां ते किमर्थं स्वांगभंगाय निजशरीरनाशाय ततः त्वं तान् सरभान् तुमुलकरकावृष्टिहासावकीर्णान् कु
र्वीथाः न केवलं तत्रैव वा अथापि अन्योपि जनैः फलारंभयुक्ताः पुरुषाः परिभवपदं न स्युः पराभवस्थानेन स्युः न भवेयुः लोके रुपहास्यमाना परिभवं न भ
वतीत्यर्थः॥५५॥ तत्रेति सातिशायश्रेयः सिद्धानामं भोधरं प्रबोधयन्नाह॥ हे जलद त्वं तत्र तस्मिन् हिमाचले अर्द्धेन्दुमौलेः श्रीमहादेवस्य चरणन्यासं पा
दमुद्रां भक्तिनम्रः सन् परीयाः प्रदक्षिणीकुर्याः किंविशिष्टं चरणन्यासं दृषदि व्यक्तं शिलातले स्पष्टं अपरं किंविशिष्टं चरणन्यासं शश्वत् निरंतरं सिद्धै
रुपहृतबलिं देवविशेषैरुपहृतः पूजा उपहारं यस्य सः तं॥ श्रद्दधानाः श्रद्धावंतः पुरुषाः यस्मिन् चरणन्यासे दृष्टे सति स्थिरपदप्राप्तये कल्पंते। निष्प

लब्रमयस्थानलाभाय समर्थाः भवंति किंविशिष्टाः श्रद्दधानाः दूरं अतिशायेन उद्धूतपापाः गतकल्मषाः कस्मात्कारणात् करणं शरीरं तस्य विगमा
त् विनाशात्॥ अथवा करणं इंद्रियाणां विगमात् विनाशात्॥ पुरुषो नाप्य भवेः तस्मात्॥५६॥ प्रालेयाद्रेरिति॥ उत्तराशां प्रति त्वरितगमनोपायं पयो
दस्योपदिशन्नाह॥ हे जलद त्वं यत्क्रौंचरंध्रं तेन वर्त्मना उदीचीदिशं अनुसरेः किंभूतं हंसद्वारं हंसानां द्वारं हंसद्वारं हंसास्तेन मानससरसः समायांतीति
भावः किंकृत्य प्रालेयाद्रेस्तुषारगिरेरुपतटं तटसमीपे तांस्तान् विशेषान् उद्भूतान् अभूतपतिपदन्यासप्रभृतीन् उत्क्रम्य उल्लंघ्य किंविशिष्टं क्रौंचरं
ध्रं भृगुपतियशोवर्त्म। परशुरामकीर्तिप्रसरण[illegible]मध्यानं। किंविशिष्टस्त्वं तिर्यगायामशोभी तिर्यग्यो सदायामस्तेन शोभते इत्येवं शीलः सतिरश्ची
नविस्तारमनोहरः कइव। विष्णोर्नारायणस्य श्यामपादः इव। यथा विष्णोः श्यामपादः शुशुभे। किंविशिष्टस्य विष्णोः बलिनियमाभ्युद्यतस्य बलेः नि
यमने बंधने तस्मिन्नभ्युद्यतस्य उद्यतस्य॥६०॥

क्रौंचरं
ध्रं



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शब्दायंत इति॥ संबोधने हे जलद चेत् यदि तत्र तस्मिन् हिमाचले कीचकाः सच्छिद्रवेणवः अनिलैः वायुभिः पूर्यमाणाः संतो शब्दायंते। शब्दं कुर्वंति॥
तदा किन्नरीभिः किंपुरुषांगनाभिः त्रिपुरविजयस्त्रिपुरदाहाख्यप्रबंधो गीयते किंविशिष्टाभिः किन्नरीभिः संरक्ताभिः मधुरकंठीभिः तेतव ध्वनिः कं-
दरेषु गुहागतेषु चेद्यदि स्यात् प्रसरनशीलो भवेत् तदा पशुपतेः शंभोः संगीतार्थः तत्र हिमाचले समग्रः भावी संपूर्णो भविष्यति॥ उपमीयते मुरज
इवाउपचारात्समुरजोध्वनिरिव॥ कीदृशः ध्वनिः निर्ह्रादी वज्रतुल्यः॥ ६१॥ गत्वेति॥ नूतनेन दर्शनेन नोभोधरस्य आकाशोदाधारो भूधराधिगमं उप-

ऊर्द्व

दिशन्नाह॥ हे जलद त्वं उदीचीं गत्वा कैलाशस्य अतिथिः स्यात् अभ्यागतो भवेत् प्राघुरित्यर्थः यतः कारणात् किंविशिष्टस्य कैलाशस्य दशमुख-

भुजोच्छ्वासितप्रस्थसंधेः पुरा दशमुखेन रावणेन उच्छ्वासिता उत्पाटिता प्रस्थसंधिर्यस्य सः तस्य। पुनः कीदृशस्य। कैलाशस्य। त्रिदशवनितादर्पणस्य सु-
रसुंदरीणां अवलोक्यशिला यस्य सं सः तस्य। कैलासः शृंगोच्छ्रायैः शिखरप्रसारैः खं आकाशं वितत्य व्याप्य स्थितः। किंभूतैः शृंगोः कुमुदविशदैः
केरववत् निर्मलैः किंविशिष्टः कैलासः। उत्प्रेक्ष्यते त्र्यंबकस्य अट्टहास इव। किंविशिष्टः अट्टहासः। प्रतिदिनं दिशं दिशं प्रतिराशीभूतः समू-
हो जातः॥ ६२॥ उत्पश्यामीति॥ हे जलद अहं अद्रेः शोभां उत्पश्यामि संभावयामि कस्मिन् सति। त्वयि तटगते सति। किंविशिष्टे त्वयि स्निग्धभिन्नांजनाभे॥
स्निग्धं मसृणं भिन्नमर्दितं यत् अंजनं कज्जलं तद्वत् आभा यस्य स तस्मिन्। अरूक्षमर्दितकज्जलरुचौ॥ किंविशिष्टस्य तस्य सद्यः कृत्तद्विरददशन-
छेदगौरस्य तत्कालच्छिन्नदंतिदंतगौरस्य॥ शशांकावदातस्य। किंभूतां शोभां स्तिमितनयनप्रेक्षणीयां अग्रे रमणीयस्तात् निश्चलनेत्रावलोक-
नीयां कस्येव हलभृतः बलभद्रस्येव यथा हलभृतः बलभद्रस्य वाससि वस्त्रे अंशन्यस्ते सति स्कंधारोपिते सति शोभा अभवत्। किंविशिष्टे
वाससि मेचके कृष्णवर्णे॥ ६३॥

तस्य हिमालयस्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१४
मे·टी·

कैलाशमाश्रितवतः पयोदस्य शालायली चरणसेवामुपदिशन्नाह॥ हे जलद यदि च तस्मिन् वप्रक्रीडाशैले कैलासे गौरी पार्वती पादचारेण चक्रमेन विच
रेत् किं विशिष्टा गौरी शंभुना महेश्वरेण दत्तहस्ता अर्पितकरा लंबना। किं कृत्वा। भुजगवलयं हित्वा सर्पकंकणं परित्यज्य। ततः त्वं अग्रयायी अग्रे याती ति
अग्रगामी सन् सोपानत्वं कुरु सोपानपरंपरां रचय किमर्थं मणितटारोहणाय। किं विशिष्टस्त्वं भंगीभक्त्या लहरीविच्छित्त्या विरचितवपुः अपरं किं विशि
ष्टस्त्वं स्तंभितांतर्जलौघः स्तंभितो निश्चलीकृतोंतर्मध्ये जलौघो जलप्रवाहो येन सः॥६०॥ रुद्रादिपर्वतेनपयोदस्य देवांगनानां प्रसंगे संभावयन्ना
ह॥ हे जलद तव क्रीडाशैले सुरयुवतयो देवांगनाः अवश्यं निश्चितं यंत्रधारागृहत्वं नेष्यंति यंत्राणपेनेकसंचारचतुरांतर्विवराविभावितपुत्रकादीनी
तं करतलाघातेन यत्र धारा ह त्वारिधारा कुपलक्षितं। कुहारागी मता पत्रा मनं धनिनां धाम यंत्रधारागृहं तत्प्राप्तो यंत्रधारागृहत्वं। किं विशिष्टं त्वां कु
लिशवलयोद्घट्टनोद्गीर्णतोयं वज्रमयत्वात् कुलिशाख्येन हीरिका वाच्यंते रूपलक्षितानि यानि वलयानि कंकणानि तेषामुद्घट्टनेन उद्घर्षणेन॥
उद्गीर्णं निर्गच्छत् जलधारं तोयं यस्य सः। तां हे सखे हे मित्र ताभ्यो यदि तव ताभ्यः। मोक्षो न स्यात् न भवेत्॥ किंभूतस्य तव घर्मलब्धस्य निदाघसमये प्राप्त

स्य। ततः त्वं ताः स्त्रियः गर्जितैः भीषयेः। किं विशिष्टाः ताः क्रीडालोलाः। किं विशिष्टैः गर्जितैः श्रवणसुभगैः कर्णकठोरैः॥६१॥ हेमांभोजेति॥ भव
भूधरस्थितमतुलमदिव्यभावानुभवभावनाभोधरं प्रलोभयन्नाह॥ हे जलद त्वं नगेंद्रं कैलासं निर्विशेः उपभुंजीथाः कैः ललितैः विलासैः किं
विशिष्टैः ललितैः नानाचेष्टैः नानाप्रकारकाचेष्टाः कायकृतव्यापारा येषु तैः॥ किं कुर्वाणः मानसस्य मानसाख्यस्य सलिलं पानीयं आददानः गृ
ह्णानः किंभूतं सलिलं हेमांभोजप्रसवि सुवर्णकमलजनकं। किं कुर्वन् कामं स्वेच्छया ऐरावतस्य मुखपटप्रीतिं कुर्वन् करीणां वदनच्छन्नेदकं पासो
मुखपटं मुखमुच्यते। अपरं किं कुर्वन्। वातैः कल्पद्रुमकिसलयानि धुन्वन् वातैः सलिलगुरुभिः। कल्पवृक्षांकानि देति पाठः॥६२॥

एमः
२४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥तस्येति॥कामिनीकमनीयत्वोपालंभोपदेशेन जलधरं धनाधिपपुरीं गमयितुमाह॥हे कामचारिन् स्वेच्छया चारिन् त्वं तस्य कैलासस्य उत्संगे अल

इतिनर कां दृष्ट्वा पुनर्न ज्ञास्यसे अपितु ज्ञास्यसे।किंविशिष्टामलकां स्रस्तगंगादुकूलां॥स्रस्ता स्थानाद्भ्रष्टा गंगैव दुकूलं यस्याः सा तां।किंविशिष्टस्य तस्य उत्संगे द

त्तां प्रणयिन इव वल्लभस्येव॥अमदोपि कामुकसंगसंगिनी सात्विकभावात् स्रस्तवसना भवति या अलका वः युष्माकं काले वर्षाकाले विमानैर्वहति॥ अभ्रवृंदं

धारयति॥किंभूतमभ्रवृंदं।सलिलोद्गारं उद्गीर्णं सलिलस्य उद्गारः स्रावो यत्र तत्।केव।कामिनी अलकमिव।तं तद्विमानानां मुक्तामंगलघटपटलेषु पत्र

लकत्वे सलिलोद्गारस्य मुक्ताजालग्रथितत्वे किंभूतमलकं मुक्ताजालग्रथितं मुक्तानां जाले नसमूहेन ग्रथितं गुंफितं।इत्युपमानसंबंधः॥६४॥विद्युत्वंतमि

ति।सदायस्य वल्लुपन्यासेनांबुदस्य अलकाकनकौतुकमुपदिशन्नाह॥हे जलद त्वं तत्र तस्यां अलकायां प्रासादाः हर्म्याः तुलयितुं अलं समर्था भवंति

कैस्तैस्तैः विशेषैः अभिधीयमानसदृशोपमैः।किंभूतं त्वां विद्युत्वंतं।विद्युत् विद्यते यस्य सः तं तडित्संयुक्तं।किंविशिष्टाः प्रासादाः ललितवनिताः ललि

तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्॥या वः काले वहति सलिलोद्गारमुच्चैर्विमाने मुक्ताजालग्रथित

मलकं कामिनीवाभ्रवृंदं॥६३॥विद्युत्वंतं ललितवनिताः सेंद्रचापं सचित्राः संगीताय प्रहतमुरजाः स्निग्धगंभीरघोषं।अंतस्तोयं मणिमयभुवस्तुंगमभ्रं

लिहाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः॥६४॥आष्यरूपा मादिनकरहयस्पर्द्धिनो यत्र वाहाः शैलोदग्रास्त्वमिव करिणो वृष्टिमंतः प्रभेदा

त्यायोधाग्रएपः प्रतिदशमुखं संयुगे तस्थिवांसः प्रत्यादिष्टाभरणरुचयो यत्र इहासवलं कैः॥६५॥ प्रासादाः

ताः सविलासाः वनिताः नायिकाः येषु ते।अपरं किंविशिष्टं त्वां सेंद्रचापं इंद्रधनुर्युक्तं अपरं किंविशिष्टाः प्रासादाः सचित्राः सह चित्राख्येन वर्त्तंते चित्रसहिताः

चित्रमपि पंचवर्णमभवत्॥अपरं कथंभूताः प्रासादाः संगीताय प्रहतमुरजाः वादितमृदंगाः प्रेक्षार्थं गीतवाद्यं च संगीतमभिधीयते।किंविशिष्टं त्वां स्नि

ग्धगंभीरघोषं मधुरधारध्वनिं।अपरं किंभूतं त्वां अंतस्तोयं अंतर्मध्ये तोयं यस्य सः तं।अपरं किंविशिष्टाः प्रासादाः मणिमयभुवः इंद्रनीलादिमणि

पुनः निबद्धाः भूमी हम्ये त्वां तुंगं उच्चैस्तरं।अपरं किंविशिष्टाः प्रासादाः अभ्रंलिहाग्राः अभ्रं लिहंति आकाशस्पर्शीनि अग्राणि येषां ते॥६४॥ ॥आष्यरूपामे

ति॥तस्याः विशिष्टतरं निरूपयन्नाह॥हे जलद यत्र यस्यां अलकायां वाहाः अश्वाः वर्त्तंते॥किंभूताः वाहाः आष्यरूपाभाः वा लक्षण रूपा मलाः हरित

वर्णाः इत्यर्थः आष्यं वा लक्ष्ण घासो इत्यमरः अपरं किंभूताः हे जलद यस्यामलकायां करिणः वर्त्तंते।कीदृशाः करिणः शैलोदग्राः पर्वतवत् उन्नताः

पुनः कीदृशाः करिणः प्रभेदात् मदस्रवात् वृष्टिमंतः वृष्टियुक्ताः।क इव त्वमिव यथा त्वं वृष्टिमान् तथा।यत्र यस्यामलकायां योधाग्रण्यः वर्त्तंते योधा मु

पुनः किं०वाहाः दिनकरहयस्पर्द्धिनः सूर्याश्वसदृशाः

CC-0 Dharmartha Trust, J&K. Digitized by eGangotri/Vaidika Bharata Initiative

ख्याः वर्त्तते। किं विशिष्टाः योधाग्रण्यः संयुगे संग्रामे प्रतिदशमुखं रावणं प्रति तस्थिवांसः स्थिताः अपरं कथंभूताः योधाग्रण्यः चंद्रहासव्रणांकैः चंद्रहा
सः रावणस्य खड्गः तस्य व्रणांकाः चिह्नं ते चंद्रहासव्रणांकास्तैः। प्रसादितश्च मरणरूपचयः निराकृता अलंकारकौतुकः। ३ कैं च। आख्यादयसि किंमुग्धे वा।
स्त्रेणाधर १ दत्तवांस व्रणालंवक्षो मं ते धीराधीरवयोधराः। ८८॥ हस्त इति। पुनरपि तस्याः अलकायाः चिह्नांतरं निरूपयन्नाह। हे जलद यत्र यस्याम् अल
कायां वधूनां चूडापाशे नवकुरवकं नोरसलीहत्तस्य कुसुमं वर्त्तते। हे जलद यत्र यस्याम् अलकायां वधूनां शिरीषं शिरीषपुष्पं वर्त्तते। यत्र वधूनां सीमंते
केशमध्ये नीपकदंबपुष्पं वर्त्तते। किंभूते शिरीषं चारु सुंदरं। किं विशिष्टं नीपं त्वदुपगमजं भवदुपगमसमयभवं। हे जलद यत्र यस्याम् अलकायां व
धूनां हस्ते लीलाकमलं वर्त्तते क्रीडाकमलं वर्त्तते। यत्र वधूनाम् अलकं वर्त्तते। किंभूतं अलकं बालकुंदानुविद्धं बालकलियांयुक्तं। हे जलद यत्र व
धूनाम् आननश्रीः वर्त्तते किंभूता आनं॰ लोध्रप्रसवरजसा लोध्रप्रसवस्य पुष्पाणां रजसा पांडुतां पीततां नीता। प्रापिता॥ ९०॥ यस्यामिति। भगोतिराय

विभवोपभोगवर्णनव्याजेन पायोदस्य पुण्यजनगारी जिगमिषां त्वरां कारयितुमाह॥ हे जलद यत्र यस्याम् अलकायां यक्षाः मधुमद्यं आसेवंते। आस्वादयं
ति। किं कृत्वा हर्म्याणां स्थलानि हर्म्यस्थलानि एत्य प्राप्य। धवलगृहकुट्टिमानि प्राप्य। किंभूतानि हर्म्यस्थलानि सितमणिमयानि स्फटिकमणिनिर्मितानि
पुनः कथंभूतानि हर्म्यस्थलानि ज्योतिःछायाकुसुमरचितानि ज्योतिषां नक्षत्राणां यानि प्रतिबिंबानि तान्येव कुसुमवनानि पुष्पप्रकारायेषु तानि वा
ज्योतिषां नक्षत्राणां याः छायाः तान्येव रचितानि कुसुमानि पुष्पाणि येषु तानि। कश्चिदमाधंतस्य परत्वे॥ स्फटिकमणित्वेन आकाशस्य प्रतिबिंब
त्वात्॥ किं विशिष्टाः यक्षाः उत्तमस्त्रीसहायाः उत्तमकुलप्रसूताः वरिणीता याः स्त्रियस्ताः सहाया येषां ते। केषु सत्सु पुष्करेषु तूर्यमुखेषु शान
कैः मंदं मंदं आहतेषु ताडितेषु सत्सु। किं विशिष्टं मधु रतिफलं रतेः संभोगस्य सुखं तदेव फलं यस्य तत्। अपरं कीदृशं मधुकल्पवृक्षप्रसूतं कल्प
वृक्षोत्पन्नं किंभूते पुष्करेषु त्वद्गंभीरध्वनिषु त्वत्तव गंभीरो ध्वनिर्येषां तानि त्वद्गंभीरध्वनीनि तेषु त्वद्गंभीरध्वनिषु॥ ७१॥ ॥ ७१॥

कर्णे

एम:
१५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गलत्कंपादिति।धर्मांतरोपन्यासेन तामेव नगरीं निवेदयन्नाह॥हे जलद यत्र यस्याम् अलकायां कामिनीनां नैशो मार्गः निशावृत्तांतः सवितुः श्रीसूर्यस्य
उदये सूच्यते॥ज्ञाप्यते।कैः मंदारपुष्पैः।कीदृशैः मंदारपुष्पैः अलकपतितैः कुटिलकेशेभ्यः च्युतैः।कस्मात् गमनोत्कंपात् गतिर्गमनं तया यदुत्कंपो शीघ्रं तस्मात्
गलत्कंपात्॥न केवलं मंदारपुष्पैः अपरं कनककमलैः स्वर्णपद्मैः।कथंभूतैः कनककमलैः पत्रपत्रच्छेद्यैः पत्राणां छेदनं खंडनं अर्हंति पत्रच्छेद्यानि नियतः॥
वा पत्रैः छेद्यानि पत्रघटनेन छेद्यैः छेदितुं द्वैधीत्रैधीचतुर्धी द्विभावविवरं प्राप्तैः॥पुनः किंभूतैः कनककमलैः कर्णविभ्रंशिभिः कर्णात्पतनशीलैः।न केवलं
कनककमलैः अपरं हारैश्च किंविशिष्टैः हारैः मुक्तामालैः मुक्तानां मालानियेषु तेतैः॥पुनः कीदृशैः हारैः स्तनपरिसरछिन्नसूत्रैः स्तनयोः परिसरेण
विस्तारेण छिन्नानि त्रुटितानि सूत्राणि येषां तेतैः अलघुजघनमासक्रांतावयाघनतररसमिति।तरतिस्फुटमार्गांतरलरभसंजातगमनेन यः कं

पः प्रचलनेन तस्मात्निपतितैः रमीभिश्चिह्नैः कामिनीनां नैशो मार्गः निशावृत्तं तं कामिनीभिः यदाचरितं तदेव ततः प्रातः लोकैः सूच्यते।विपरीतसुरतलनी
लापिंतमितिभावः।१२।नीवीबंधेति॥तामेव पदे श्वरपुंडरीकपुराणामंतरेण बोधयन्नाह॥हे जलद यत्र यस्याम् अलकायां अंगनानां यत्तत्स्त्रीणां प्रेरि
तः चूर्णमुष्टिः रा।ग्नादिमुष्टिः विफलः भवति निष्फलत्वरूपो भवति चूर्णपटवासादिगंधद्रव्यं तस्य मुष्टिः चूर्णमुष्टिभिः कृत्वा अभिमुखं सन्मुखं रत्नप्रदीपान् भि
प्राप्य रत्नान्येव प्रदीपाः रत्नप्रदीपाः तान्।केषु सत्सु प्रियेषु वल्लभेषु रागात् सुरताभिलाषायाः क्षौमं पटदुकूलं आक्षिपत्सु सत्सु छोटयित्सु सत्सु
किंविशिष्टं क्षौमं नीवीबंधोच्छ्वसितशिथिलं नीवीबंधस्य यदुच्छ्वसितं शिथिलत्वं तेन शिथिलं।नीवीबंधशिथिलत्वे सति वस्त्रमपि शिथिलं भवति।किंवि
शिष्टेषु प्रियेषु अनिभृतकरेषु चंचलहस्तेषु किंविशिष्टान् रत्नप्रदीपान् अर्चिस्तुंगान् दीप्तिभिरुन्नतान्।किंविशिष्टानामंगनानां ह्रीमूढानां त्रपातर
लितानां॥१३॥



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यत्र यस्यामलकायां वधूनां आनंदोत्थं नयनसलिलं वर्त्तते
अन्यैः निमित्तैः रोदनादिभिर्न ।

मे.टी. ६६ 16

आनंदोत्थमिति ॥ तत्र स्थितानां शोकरागपरानुभवस्याभावात् भावेन तदतिशयं प्रकटं तत्क्रमेणोपयोगं संवर्त्तयन्नाह ॥ हे जलद यत्र यस्यामलकायां वधूनां कुसुमशरजात् कंदर्पोत्थात् तापात् अन्यस्तापो न किंभूतात्तापात् इष्टसंयोगसाध्यात् वल्लभसंयोगेनोपचित्तु... लयस्य तस्मात् ॥ यत्र यस्यां अलकायां प्रणयकलहात् स्नेहकलहात् अन्यत्र विप्रयोगोपपत्तिः वियोगप्राप्तिर्विनास्ति । यत्र यस्यामलकायां वित्तेशानां यक्षेश्वराणां खलु इति निश्चयेन तयो वनादन्यत् वयः नास्ति ॥ ७४ ॥ यत्रेति ॥ तत्रस्थानां सर्वपदार्थानां दिव्यप्रभावेन रामणीयकं सदैव वदद्रूपं वामेव तापयन्नाह ॥ हे जलद यत्र यस्यामलकायां पादपाः वृक्षाः वर्त्तते । किंविशिष्टाः पादपाः उन्मत्तभ्रमरमुखराः मत्तमधुकरवाचालाः किंभूताः पादपाः नित्यपुष्पाः नित्यं दिव्यानुभावात् सर्वकालपुष्पाणि येषु ते यत्र यस्यां अलकायां नलिन्यः कमलिन्यो वर्त्तन्ते । किंविशिष्टाः कमलिन्यः हंसश्रेणीरचितरसनाः हंसानां श्रेणी हंसश्रेणी । तया रचिता रसना मेखला यासां ताः किंविशिष्टाः नलिन्यः नित्यपद्माः नित्यं दिव्यप्रभावात् सर्वकाले पद्मानि यासु ताः यत्र यस्यां अलकायां भवनशि

भवन

खिनो गृहमयूराः वर्त्तंते किंविशिष्टाः शिखिनः केकोत्कंठाः केकया मयूरवाण्या उत्कंठिताः । भवदागमने एतेषां आकुलत्वं संभवति । तत्तु दिव्यानुभावात् सदैवेत्यर्थः अपरं किंभूताः भवनशिखिनः नित्यभास्वत्कलापाः । नित्यं दिव्यानुभावात् सर्वकाले भास्वति देदीप्यमानानि कलापानि पिच्छानि येषां ते । यत्र यस्यामलकायां

रजनीमुखाः

प्रदोषा वर्त्तंते । किंभूताः प्रदोषाः नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः नित्यं चंद्रस्य शशांकस्य शिरसि संततावस्थायित्वात् सर्वकाले ज्योत्स्नया चंद्रिकया प्रतिहताः तमसामंधकाराणां वृत्तयः तैः रम्याः सुंदराः नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः ॥ ७५ ॥ नेत्रानीता इति अपि तानो तरं तस्याएव पुरो निरूपयन्नाह ॥ हे जलद यत्र यस्यामलकायां त्वादृशाः जललवमुचः त्वत्सदृशाः मेघाः जाले गवाक्षे जर्जराः शतशः स्फुटिताः विध्वंसंते इति । निस्सरंति । किं कृत्वा आलेख्यानां चित्राणां स्वसलिलकणिकादोषं उत्पाद्य किंभूता जल... उत्सेधते । सद्यस्तत्कालमेव शंकास्पृष्टा इव । अस्याभिरभिनिविष्टेः वह्निरजच्चिह्नं स्वत्वमिति भयत्रस्ता इव पुनः किं जलमुचः सततगतिना वायुना यद्विमानाग्रभूमीः तस्याः अलकायाः प्रासादश्रीः तिमे नीताः प्रापिताः किंविशिष्टाः सततनेत्राः प्रापके नेत्र... किंभूताः जल धूमोद्गारानुकृतिनिपुणाः जर्जरत्वमुद्गारः धूमस्य उद्गारः धूमोद्गारः तस्यानुकृतिः अनुकारः तत्र निपुणाः दक्षाः ॥ ७६ ॥ ७६ ॥

रामः ६६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अद्रीणां तर्भवननिधय इति॥ तत्रवासिनां अतिशयसुखोपभोगं कथयन् तामेव निवेदयन्नाह॥ हे जलद यत्र यस्याम् अलकायां कामिनो विलासिनः किन्नरैः किंपुरुषैः
सह बद्धसख्याः दिनेदिने प्रति बहिः बाह्योद्यानं वैभ्राजाख्यं उपवनं निर्विशन्ति उपयान्ति॥ किं विशिष्टाः विलासिनः अद्रीणां तर्भवननिधयः भवनस्यान्तः अन्तर्भवनं अक्षी-
णाः अक्षयाः अन्तर्भवननिधयो येषां ते किंभूतैः किन्नरैः धनपतियशः कुबेरकीर्तिमुद्गायद्भिः। पुनः कीदृशैः किन्नरैः रक्तकण्ठैः मधुरकण्ठैः। अपरं किं विशिष्टाः
कामिनः विबुधवनितावारमुख्यासहायाः विबुधवनिताः देवाङ्गनास्वरूपाः वारमुख्याः पण्ययोषितः सहायाः येषां ते किंभूतमुपवनं बद्धापानं च रितपानगोष्ठी-
कं॥७॥ मन्दाकिन्या इति। तत्कन्यानां गङ्गापुलिने क्रीडाविशेषं कथयन् तामेव पुरीं बोधयन्नाह। हे जलद यत्र यस्याम् अलकायां कन्याः मणिभिः संक्रीडन्ते रमन्-
ते॥ किंभूताः कन्याः अमरप्रार्थिताः सत्स्वरूपातिशयत्वात् देवैरभिलषिताः। पुनः किंभूताः कन्याः मन्दाकिन्याः गङ्गायाः मरुद्भिः वातैः सेव्यमानाः किंभूतैः मरु-
द्भिः सलिलशिशिरैः पानीयशीतलैः। पुनः किंभूताः कन्याः मन्दाराणां मन्दारवृक्षाणां छायया वारितोष्णाः निषिद्धातपाः। किं विशिष्टानां मन्दाराणाम् अनुतटरुहां
तटस्य समीपे अनुतटं तत्र रोहन्तीति अनुतटरुहः तेषां अनु०। किं विशिष्टैः मणिभिः कनकसिकतामुष्टिनिक्षेपगूढैः सुवर्णवालुकामुष्टिन्यासगूढैः॥८॥
वास इति। तामेवाऽलकां प्रकारान्तरेण स्थापयन्नाह॥ हे जलद यत्र यस्याम् अलकायाम् एकः कल्पवृक्षः सकलं समस्तं अबलामण्डनं भूषणं सूते भवति॥ किं
सूते इत्याह॥ चित्रं मनोज्ञं वासो वस्त्रं सूते। मधु॥ किं विशिष्टं मधु॥ नयनयोर्विभ्रमादेशदक्षं नेत्रयोः विलासादेशे चतुरं किसलयैः पल्लवैः स-
ह पुष्पोद्भेदं पुष्पविनिर्गतं सूते। भूषणानाम् अलङ्काराणां विकल्पान् हारकेयूरनूपुरप्रभृतीन् सूते। न केवलं भूषणानां विकल्पान् सूते अपि अला-
क्षारागं अलक्तकं च सूते। किं विशिष्टं लाक्षारागं चरणकमलन्यासयोग्यं पादपद्मन्यासे योग्यं॥९॥ ७९ ७९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे.टी.
७

॥यत्रेति॥पुनरपि तस्यामिन्द्रानविशेषं कथयन्नाह॥हे जलद यत्र यस्यामलकायां चंद्रकांताश्चंद्रमणयो निशीथे मध्यमायां रात्रौ स्त्रीणामंगग्लानिं दे-
हेषु व्यालुंपंति। अपनयंति। किंभूतानां स्त्रीणां प्रियतमभुजालिंगनोच्छ्वासितानां। प्रियतमस्य वल्लभस्य भुजालिंगनेन उच्छ्वासितानां श्रीपीडि-
तानां कथंभूतामंगग्लानिं सुरतजनितां। संभोगोत्पादितां किं विशिष्टाः चंद्रकांताः तंतुजालावलंबाः। तंतुसंतानप्रोताः अपरं किं विशिष्टाश्चंद्रकां-
ताः स्फुटजललवस्यंदिनः प्रकटतोयकणस्राविणः। कैः चंद्रपादैः चंद्रकिरणैः किंभूतैः चंद्रपादैः त्वत्संरोधापगमविशदैः।हरशिरज्योत्स्ना
तश्शांगकरः नकरस्य त्वत्संरोधाभावदृतिभावः॥७८॥ मत्वेति॥ हे जलद यत्र यस्यामलकायां मन्मथः कामः प्रायः बाहुल्येन चापं न वहति नधा-
रयति कस्मात् भयात् किं कृत्वा धनपतिसखं देवं महेश्वरं साक्षाद्वसंतं मत्वा॥ ज्ञात्वा॥ किं विशिष्टं चापं षट्पदज्यं भ्रमरमालामौर्वीकं तत्सध-
नुषः आरंभः कृतः विधिः चतुरवनिताविभ्रमैरेव सिद्धः॥ विदग्धानां नायकविलासैरेव निष्पन्नैः। कथंभूतैः चतुरवनिताविभ्रमैः सभ्रूभंगप्रति

हतनयनैः सभ्रूभंगानि प्रतिप्रतिहतानि नयनानि लोचनानि येषु तैः सकटाक्षप्रस्थापितनेत्रैः। केषु कामिलक्ष्येषु कामिनः लक्ष्याणि वेध्यानि
कामलक्ष्याणि तेषु पुनः किंभूतैः विभ्रमैः अमोघैः सफलैः॥७९॥ तत्रेति॥ निजभवनानि स्थापयन्नाह॥ हे जलद यत्र यस्यामलकायां धनपतिगृ-
हादुत्तरेण उत्तरस्यामुत्तरवर्तिन्यां दिशि अस्मदीयमागारं गृहं वर्तते॥ किंभूतमागारं तोरणेन दूराल्लक्ष्यं दूराद्दृश्यं किंभूतेन तोरणेन सुरपतिधनु-
श्चारुणा। इंद्रचापवन्मनोज्ञेन॥ यस्य गृहस्य उद्याने उपवने बालमंदारवृक्षो वर्त्तते। नूतनमंदारतरुः वर्त्तते। किंभूतः बालमंदारवृक्षः कृतकतनयः
कृत्रिमपुत्रः अपरं किंभूतः मंदारवृक्षः मे मम कांतया वर्द्धितः॥ पुनः किंभूतः बालमंदारवृक्षः हस्तप्राप्यस्तवकनमितः हस्तप्राप्याः गुच्छास्तैर्नमितः

सूत्रादेषपत्रा
लिप्रोत्पन्ना
सेपरिपत्र
स्थीयतेतनोर
८४

॥८०॥ ८० ॥८०॥



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वापीइति।तस्यैवचिह्नांतरंनिरूपयन्नाह।हेजलदनकेवलेवालमंदारवृक्षोवर्त्तते।अपरंप्रस्तुतएवोद्यानेवापीवर्त्तते।किंभूतावापीमरकतशिलाबद्धसो
पानमार्गा।मरकतान्छमणिस्तस्यशिलामरकतशिलास्ताभिःबद्धःसोपानमार्गोयस्यांसा।किंभूतावापीहेमभिःमयानिहैमानिहैमैःहेमैःसुवर्णकमलैः
विकचकमलैःविकसितपद्मैःछिन्नाःआच्छादिता।किंविशिष्टैःविकचकमलैःस्निग्धवैडूर्यनालैःस्निग्धानिकांतिमंतिवैडूर्यमणितन्मयानिनालानि
येषांतानि।अपरंकिंकृत्वा।तैः।।हंसाःयस्याःवाप्यास्तोयेकृतवसतयोविहितवासाःसंतःसन्निकृष्टं(समीपं)निकृष्टमपिमानसंसरोनध्यास्यंति।नस्मरंतिकिंकृ
त्वा।त्वांप्रेक्ष्यतेषांहियजलधरस्तारसेकतुषितसलिला।।ग्रीष्मावलोकनेनक्षोभकःसमुत्पद्यते।तस्यांपुनर्दिव्यभूमित्वात्नवजलकाजनितकालुष्या
भावात्तेनअपास्तक्षोभकास्त्वांप्रेक्ष्यसंनिकृष्टमपिमानससंनस्मरंति।इतिभावः।।८०।।तस्याइति।।चिह्नांतरेणतामेववापींनिरूपयन्नाह।।हेजलद

तस्याःवाप्यास्तीरेतटेक्रीडाशैलःखेलनपर्वतोवर्त्तते।।किंविशिष्टःक्रीडाशैलःइंद्रनीलाख्यैःमणिभिःरचितशिखरःकिंभूतैःइंद्रनीलैःपेशलैः
मनोज्ञैःपुनःकिंभूतःक्रीडाशैलःकनककदलीवेष्टनप्रेक्षणीयःसुवर्णकदलीआवरणेनरमणीयःद्रष्टव्यः।हेसखेहेमित्रअहंत्वांप्रेक्ष्यइतिका
रणात्कातरेणआधारेणचेतसातमेवक्रीडाशैलमेवस्मरामियतःकारणात्मभेहिन्याःप्रियःकिंभूतंत्वां।उपांतस्फुरिततडितं।उपांतेसमीपे
स्फुरितातडिद्यस्यसःतं।पर्यंतेशोभितविद्युतं।।८१।।रक्ताशोकेति।।तदेवगृहद्वारंचिह्नांतरेणनिवेदयन्नाह।।हेजलदअत्रअस्मिन्प्रस्तुतेएवो
द्यानेरक्ताश्चासौअशोकश्चरक्ताशोकोवर्त्तते।।किंभूतःरक्ताशोकःचलकिसलयःचंचलपल्लवाः।नकेवलंरक्ताशोकोवर्त्तते।।अपरंकेसरोवर्त्तते
किंभूतःकेसरःकांतःमनोज्ञःएतौद्वावपिरक्ताशोकबकुलौमाधवीमंडपस्यप्रत्यासन्नौनिकटौवर्त्तेते।।किंभूतस्यमाधवीमंडपस्यकुरुबका
णां[illegible]वृत्तिर्यस्यसःतस्यतयोमध्यात्एकोरक्ताशोकःमयासहत्वत्सख्याःवदनमदिरांकांक्षतिकेनदोहदच्छद्मनागर्भवांछितेनअपरः अपर:
केसरःवामपादाभिलाषीवर्त्तते।।८२।।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तन्मध्येतितदेवगृहोद्यानेनलक्षणंतरेणलक्षयन्नाह॥हेजलदतन्मध्येरक्ताशोकबकुलयोर्मध्येकांचनीसौवर्णमयीवासयष्टिर्वर्त्ततेकिं
भूतावासयष्टिः फटिकफलिकाफटिकस्यस्फटिकमणेः फलिकाआसन्नपट्टिकायस्याःसाकिंविशिष्टावासयष्टिः मणिभिःमूलेबद्धाकिंभूतैःम
णिभिः अनतिप्रौढवंशप्रकाशैः अनतिप्रौढवंशावत्प्रकाशोदीप्तिविस्तारोयेषांतैः नीलकंठोमयूरःदिवसविगमेसंध्यायांयांवासयष्टिमध्या
स्तेआश्रयतिकिंभूतःनीलकंठःतालैःमिष्टमकांतयाप्रिययानर्त्तितःकिंभूतैःतालैःसपदलयस्तुभगैःशब्दायमानकंकणमनोज्ञैःकिंविशिष्टःनी
लकंठःवोयुष्माकंमेघानांसुहृन्मित्रं॥१८॥एभिरितिनिजभुवनस्यभूयःसंविक्नोपविकृमुपदिशन्नाह॥हेसाधोत्वंएभिःपूर्वोक्तैःलक्षणैःचिह्नैःभव
नंलक्षयेथाःमानीयाःकिंभूतैःलक्षणैःहृदयनिहितैःचित्तारोपितैःनकेवलमेभिर्लक्षणैःअपरंद्वारोपांतेद्वारसमीपेशंखपद्मौचदृष्ट्वाशंखप
द्मनामानौनिधीअवलोक्यकिंभूतौशंखपद्मौलिखितवपुषौलिखितशरीरौ॥तौहिकेवलपुरुषाकारौगृहद्वारशाखासुमंगलार्थंमागरेखयालिख्य

तेननुनिश्चितेअहंएवंमन्येऽधुनामद्वियोगेनक्षामच्छायंवर्त्तते॥क्षामातुच्छाछायायाशोभायस्यतत्यतःकारणात्खलुनिश्चयेनकमलंसूर्यापाये
स्तेसतिस्वामभिख्यांनपुष्यतिस्वांशोभांनविकसति॥अभिख्यानामशोभयोरित्यमरः॥निजमेवनाभ्यंतरविलोकनेनप्रकारांतरंनिरूपयन्नाह॥हेज
लदत्वंविद्युदुन्मेषदृष्टिंविद्युदेवोन्मेषदृष्टिःपलकदृष्टिःतांअंतर्भवनपतितांगृहमध्यगतांसतीअल्पाल्पभासांअतिशयेनाल्पकांतिंकर्तुंअर्हसियोग्यो
भवसिकिंभूतःसन्प्रथमकथितेपूर्वोद्दिष्टेक्रीडाशैलेनिषण्णःउपविष्टःसन्किंकृत्वासद्यस्तत्कालंसवकलभतनुतांगत्वा॥करिपोतकस्तत्प्राप्य
किमर्थंशीघ्रसंपातहेतोः॥आसाराज्जसन्नरगमनायकिंभूतेक्रीडाशैलेरम्यसानौमनोज्ञशिखरे॥किंभूतांविद्युदुन्मेषदृष्टिंखद्योतालीविलसितनिभां
द्योतिरिंगणश्रेणीस्फुरितानुकारिणीम्॥८६॥ ८६ ८६ ८६ ८६॥ रामः





CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥तन्वीति॥ हे जलद तत्र तस्मिन् गृहे या एवंविधा स्यात् वर्त्तते किंविशिष्टा या तन्वी सुललितावयवा। अपरं किंभूता या श्यामा षोडशवार्षिकी।
अप्रसूता भवेत् श्यामा श्यामा मधुरभाषिणी॥ किंभूता पुनः या शिखरिदशना॥ पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुः। शिखरवद् दशना
दन्ता यस्याः सा किंविशिष्टा या पक्वबिम्बाधरोष्ठी। पक्वं यत् बिम्बं तुण्डीरकं फलं तद्वत् अधरः ओष्ठो यस्याः सा किंविशिष्टा मध्ये क्षामा कटिप्रदेशे मु
ष्टिग्राह्येत्यर्थः। किंविशिष्टा चकितहरिणीप्रेक्षणा चकिता त्रस्ता हरिणी तस्या वत् प्रेक्षणं यस्याः सा॥ अपरं किंविशिष्टा या उत्प्रेक्ष्यते धा
तुः ब्रह्मणः युवतिविषये स्त्रीविषये आद्यासृष्टिरिव। एवं ब्रह्मणः स्त्रष्टा मूलप्रकृतिः निर्मीयते तस्मात् इदं काएव निर्मितः समस्तो विवरस्त्रीलो
क इत्यर्थः। किंभूता श्रोणीभारात् नितम्बभारात् अलसगमना। पुनः किंभूता स्तनाभ्यां स्तोकनम्रा किंचिन्नम्रा। पुनः किंभूता निम्ननाभिः गम्भी
रनाभिर्यस्याः सा॥ ८१॥ तामिति॥ प्रतिपादितस्वरूपदयितदर्शनादन्युदस्य भाविकं संदेशं वक्तुमुपदिशन्नाह॥ हे जलद त्वं तावत् वल्लभां जानी

याः किंविशिष्टां तां परिणतकथां विरहखेदात् लोकवार्त्तालापां किंविशिष्टां स्थितां मे मम द्वितीयं जीवितं पुनः किंभूतां तां मयि सहचरे वल्लभे
दूरीभूते सति एकाकीं भवति॥ पुनः किंभूतां गाढोत्कण्ठां गाढा उत्कण्ठा यस्याः सा तां॥ हे जलद॥ अहं तां बालां अन्यरूपां जातां मन्ये केषु सत्सु एषु
दिवसेषु गच्छत्सु सत्सु॥ किंभूतेषु दिवसेषु गुरुषु गुरुतरेषु अथवा गाढोत्कण्ठा गुरुषु इति पाठः अपरं किंविशिष्टां वा [illegible] उपमीयते॥ तु
हिनमथितां पद्मिनीमिव॥ यथा पद्मिनी तुहिनमथिता सती अन्यरूपा भवति॥ ८२॥ नूनमिति। आत्मनो नुरागविरहदुःखानुभवं वस्तव्या
स्यावबोधयन्नाह॥ हे जल नूनं निश्चितमहं एवं मन्ये। तस्याः प्रियायाः मद्वल्लभायाः मुखं इन्दोः चन्द्रमसः दैन्यत्वं विभर्त्ति धारयति किंविशिष्टस्ये
न्दोः त्वदनुसरणक्लिष्टकान्तेः त्वदन्तर्ध्वनिग्लपिततेजसः। किंभूतं मुखं निःश्वासानां बाष्पानां अशिशिरतया उष्णत्वेन भिन्नवर्णाधरोष्ठं भिन्न
वर्णौ अरुणाभिकान्तौ तव अधरोष्ठौ यस्य तत्। किंविशिष्टं मुखं हस्तन्यस्तं करतलोपरि मुक्तं स्वभावो चायं शोकाकुलचेतसां पुनः किंभूतं मुखं
असकलव्यक्ति असकला सम्पूर्णा व्यक्तिर्यत्र तत् अपरिस्फुटाकारदर्शनं कस्मात् लम्बालकत्वात्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२५
मे.टी.
19

॥आलोके॥ ते तव वल्लभायाः संभाव्यमानव्यापारैर्निरूपयन्नाह॥ हे जलद सा मद्वल्लभा ते तव आलोकने दर्शने पुरः प्रथममेव निपतति निपति
ष्यति॥ यासतीति संबंधः। पुरोत्र परत्वे यावत्पुरा निपातयोर्लट् पुरायोगे भविष्यति काले लुट्। वर्त्तमानो भवति। अथवा बलिव्याकुला सती देव
तातिथिसपर्याव्यापारासक्तेति तव आलोकने निपतति निष्यति ष्यति। अथवा मत्सादृश्यं मम आकृतिं लिखन्ती किंभूता विरहतनुतां वि
योगकृशतां। अपरं किंभूतं मत्सादृश्यं भावगम्यं एतावद्भिः दिवसैः एतावन्मात्रेण तनुत्वे विद्यते इति चित्तामि प्रायापरिच्छेदं वा॥ अथवा सारिकां इति पृ
च्छति। तेन तव आलोके निपतति निष्यति ष्यति। किंभूतां सारिकां मधुरवचनां मधुरं वचनं यस्याः सा तां मधुरवचनां नाम्नीं मधुरालापां वा॥ किंवि
शिष्टां सारिकां पंजरस्थां पंचरगतां। इति किं कच्चिदिति। अभीष्टमत्रकं हे रसिके हे गुणानुरागिन् त्वं भर्तुः स्मरसि ध्यायसि। मम चेद् भर्त्तारं

स्मरसि हि यस्मात् कारणात्। त्वं तस्य प्रिया वल्लभा। यथा हे रसिका वल्लभ गुणानुरागिणी तथा प्रिया वल्लभा तमेव भर्त्तारं स्मरसि। तथा
तमेव भर्त्तारं स्मरसीत्यर्थः॥ ८०॥ उत्संग इति। वियोगदहनदाहदग्धहृदय निजवधास्वरूपं तां निवेदयन्नाह॥ हे सौम्य मामत्स्त्रियास्ते तव आ
लोके प्रथममेव निपतति निष्यति ष्यति। अत्र सौम्येति संबोधने सापि प्रायः त्वया सौम्येन भाव्ये। अन्यथा सती तां न दर्शनं न ददातस्यतीति भा
वः। अथवा भूयो भूयः पुनः पुनरपि स्वयमपि कृतां मूर्छनां स्मरसारात् विस्मरति। तव आलोके निपतति किं कृत्वा। कथमपि महता कष्टेन तंत्रीं सा
रयित्वा निर्मज्य सज्जीकृत्य किंभूतां तंत्रीं नयनसलिलैः आर्द्रां। किं कर्त्तुकामा गेयं उद्गातुकामा। किं कृत्वा उत्संगे वीणां निक्षिप्य किंभूते उत्संगे
मलिनवसने मलीनवाससि। इत्यलंकारत्यागात्। तस्याः पतिव्रतात्वप्रतिपादनं किंभूतं गेयं मद्गोत्रांकं मदीयनामचिह्नं किंभूतं गेयं विरचितप
दं विरचितानि स्वयं सूत्रितानि पदानि यस्य तत्॥ ८१॥

८१ ८२ ८२ ८१ ८१

रामः
२५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५२

॥शेषानिति॥ विरहिणी व्यापारनिरूपणोपदेशेन तस्याः प्रीतिप्रकारं यन्नाह॥ हे जलद वा अथवा अवशेषान् मासान् विन्यस्यंती गणयंती॥
तव आलोके निपतति निपतेति कुसुमैर्विष्टथिव्यां॥ कैः देहलीमुक्तपुष्पैः देहलीं दद्वरदारुतस्मान्मुक्तानि॥ भूमौ निहितानि पुष्पाणि तैः हारदा
रूणि। अधिष्ठातृदेवतापूजनार्थं निस्तंपुष्पाणि मुच्यते॥ कया गणनया। एकद्व्यादिकसंख्यया। किं विशिष्टस्य अवधेः विरहदिवसस्यापित
स्य विरहदिवसमारभ्योऽस्यापितस्य संवत्सरपरिमाणतया। कल्पितविरहदिवसस्यापितस्य वा। अथवा मम संयोगे मया सह संयोगे आस्वाद
यति अनुभवति। किं विशिष्टं संयोगं हृदयनिहितारंभं चित्तारोपितप्रारंभं। एवं मया सह मनसि संयोगः प्रक्रान्त-- निमीलितन
यना॥ विरहेषु वल्लभवियोगेषु सत्सु। प्रायेणैते विनोदाः दिनिगमनिका उपायाः भवंति॥ ८२॥ ॐ लकं॥ सव्यापारामिति॥ विरह
विधुरनिजवधूखेदापनोदाय यतः स्वसंदेशं पयोदस्यापदिशन्नाह॥ हे जलद अहमिति शंके। मद्वियोगं तां अहनि दिवसे यथा ये

न प्रकारेण न पीडयेत् रात्रौ पीडयेत्। किं विशिष्टां सव्यापारां देवतातिथिसपर्यादिव्यापारयुक्तां किंभूतां ते तव सखीं॥ किंभूतां निर्वि
नोदां विनोदरहितां शुकसारिकालापनलिखनादिकेलयस्तैर्वर्जितां। अत एव गुरुतरशुचं दीर्घशोकां। हे जलद त्वं अविनिद्रशयनां तां
हर्म्ये एव शय्या तस्यां स्थितां पश्य॥ किंभूत त्वं सन्निवातायनस्थः सन् हर्म्यशय्यानिकटगवाक्षस्थः सन् निशीथे मध्यमायां रात्रौ
तां स्वसखीं पत्यविलोकयः। किं कर्तुं मत्संदेशैः अलमत्यर्थं सुखयितुं न त्वर्धरात्रौ परस्त्रीदर्शनमुचितमित्याशंक्याह यतः साध्वी प
तिव्रता किं विशिष्टां उन्निद्रां निद्रारहितामित्यर्थः॥ ८३॥ [illegible] ९३ ९३ ९३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आधिक्षामेति॥ विरहकर्शितदयितादुःखंख्यापयन्नाह॥ हे ज्ञ लदयारात्रिः मयासार्द्धं इच्छारतैः कांदितसुरतकरणप्रयोगैः क्षण
मिवनीता मुहूर्त्तमिवानीता तामेवरात्रिं अश्रुभिर्यापयति अतिवाहयंतिते नवज्ञालोके निपततिनिपतिष्यति। किं अश्रुभिः उष्णैः
किंभूतैः अश्रुभिः विरहजनितैः वियोगोदितैः। किं सा आधिक्षामा मानसीपीडाया दुर्बला॥ किंविशिष्टा सा॥ विरहशयने त्वग्निव

न्नैकपार्श्वा वियोगशय्यायां न्यस्तपद्मदलादिसंस्तरणायां निषण्णा निविष्ट एको वामदक्षिणयोरन्यतमः पार्श्वः दृष्टिभागो यया सा
किंभूता सा उष्णेद्यते। प्राचीमूले पूर्वदिग्भागे हिमांशोः चंद्रमसः तनुरिव। किंभूता तनुः कलामात्रशेषा दृश्यते॥९४॥९४॥९४॥



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

।निश्वासेनेति।तस्याः दुःसहविरहदेहूपेतप्रचेतसो निद्रानाशोऽप्रकाशयन्नाह॥हे जलद तेतव निपतति नि
ष्पतिष्पति॥किं कुर्वती निःश्वासेन अलकं कुटिलकेशान् विक्षिपंती उत्सारयंतीत्यर्थः किंल क्षणेन निःश्वा
सेन अधरकिसलयक्लेशिना सोष्णपल्लवपीडकेन किंभूतमलकं।शुद्धस्नानात् केवलस्नानात् परुषं
कठोरं पुनः किंभूतमलकमागंडलंबि।कपोलं यावत् लंबायमानं।किं कुर्वती इति कारणात् निद्रामाकां

क्षंती।इतीति किंभूतेन निश्चितमहमेव मम न्यामसंयोगः स्वप्नगतोपि स्वप्नलब्धोपि सुखं चोपनयेत् उत्पाद
यति किंभूतां निद्रां नयनसलिलोत्पीडरुद्धावकाशां।नयनसलिलं लोचनाश्रु तस्य उत्पीडः प्रसरः तेन रु
द्धः अवकाशो यस्याः सा तां॥९४॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ता

॥ आद्य इति॥ स्ववल्लभायामन्योपि विरहावस्थां कथयन्नाह॥ हे जलद तव आलोके निपतति। निष्पतति। किं कुर्वती। करेण हस्तेन गंडाभोगात् कपोलफलकात् एकवेणीमसकृत् वारं वारं सारयंती क्षिपंती खेलयंती। काचासौ ग्रथिता वेणी एकवेणी तां किंभूतामेकवेणीं। कठिनविषमां कठोरनिम्नोन्नतां

अपरं किंभूतामेकवेणीं स्पर्शक्लिष्टां रूक्षी कृष्टां ब्रिय लोचनाकारिणीं। किंभूतेन करेण अयमितनखेन। अघटितनखेन। लोह सह शानखेन। अयाएकवेणी आद्ये विरह दिवसे बद्धा किं कृत्वा शिखादाम हित्वा शिरो माल्यानपहाय शापस्यांते सा मयैवोद्वेष्टनीया खोलनीया किंभूतेन मया विगलितशुचा गत शोकेन॥ ९६॥



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative
टीका

पादानिति। निजजायाविरहस्य योग्यामवस्थां कथयन्नाह॥ हे जलद ते तव आलोके निपतति निष्पतति॥
किं कुर्वती खेदात् पक्ष्मभिश्चक्षुः छादयंती किंभूतैः पक्ष्मभिः सलिलगुरुभिः शोकजलेन गुरुभिः किंभूतं चक्षुः
इंदोश्चंद्रमसः पादान् किरणान् अभिमुखं गतं सन्मुखं प्राप्तं कया हर्षप्रीत्या प्राक्तनस्नेहेन। पुनः किंभूतं चक्षुः
तथैव सन्निवृत्तं। किंभूतान्पादान् अमृतशिशिरान् अमृतेन शिशिराः शीतलाः शीताः तान् अमृतशिशिरान्। किंवत्पादा
न् जालमार्गप्रविष्टान् गवाक्षमार्गविवरागतान्। किंभूता सा न प्रबुद्धा न सुप्ता केव। स्थलकमलिनीव यथा स्थ

लकमलिनी सामेऽभ्रसहितेऽह्नि दिवसे प्रबुद्धा न भवति न सुप्ता भवति सामेत्वात्॥ स्थलकमलिन्या न तथावि
धः प्रबोधः दिवससमुद्भवात्॥ न तथाविधं स्वापः सूर्यायनत्वात्। स्थलकमलिन्याः उपमानेश्चा
दिक्रियाकुलकम्॥ ८७॥ ॥९७॥ ॥८७॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे॰ टी॰ २२ (विरहखेद)

॥सेति॥ तस्याः कमनीयोरदैन्यनिवेदयन्नाह॥ हे जलद त्वं वर्णाम्बु वक्रं विनिक्षिप्तं त्वामपि जलमयं अश्रुं मोचयिष्यति॥ किं कुर्वंती शय्योत्संगे हृदये निहितं निविडं गात्रं शरीरं असकृत् वारं वारं दुःखदुःखेन धारयंती॥ किं भूतं गात्रं संन्यस्ताभरणं तत्कालं करणं पुनः किंभूतं गात्रं पेशलं कोमलं यतः कारणात् सर्वः कोपि आर्द्रांतरात्मा स्नेहार्द्रः प्रायो वा तुल्येन करुणवृत्तिर्भवति। दयालुर्भवति॥ भवानपि सजलत्वात् आर्द्रांतरात्मा॥ ६१॥ जानइति। तस्याः विरहवर्णन

दौस्थ्यं ख्यापयन्नाह॥ हे सौम्य तव सख्याः भ्रातृजायायाः मनो मयि विषये संभृतं सस्नेहं उपचितप्रीतिं जाने। अस्मात् कारणात् अहं तां तव सखीं इत्थं भूतां शंकां एव वचेष्टा विशिष्टां तर्कयामि विचारयामि यत्प्रथमाद्योकसति प्रथमविरहे सति प्रथमवियोगे सतिखलु निश्चयेन सुभगंमन्यभावः सुभगमात्मानं मन्यते सुभगंमन्यभावः वाचालं बहुजल्पकं न करोति। हे भ्रातः यत् मया उक्तं तत् निखिलं समग्रमपि अचिरात् त्रिचतुरादिदिनैः प्रत्यक्षं पश्यसि भविष्यति॥ ९९॥ ९९

९९ ९९ ९९ ९९ ९९ ९९ ९९ ९९॥

राम॰ २२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥ रुद्धापांगेति॥ सुहृदां शुभदर्शने नखवल्लभायाः शुभनिमित्तोदयं निवेदयन्नाह॥ हे जलदाहं मतिशं के विचारयामि। यत्त्वय

या सा: मद्वल्लभायाः नयनं मीनशोभातर चलकुवलयश्रीतुलामेष्यति। कस्मात्स्यस्खलनात्। चंचलनीलोत्पलशोभानु

हतिं गमिष्यति। कस्मात्। त्वयि आसन्ने निकटवर्त्तिनि सति। किं विशिष्टं नयनं मधुनः प्रसादेन त्यक्तं निराकरणात् वि

स्मृतभ्रूविलासमपि। न केवलं विस्मृतभ्रूविलासं अपरं अलकैः रुद्धापांगकटाक्षं। किं भूतेन यनेन। अंजनस्नेहशून्यं। किं भू

तेन नयनेन उपरिस्पंदि उपरिष्टात्स्फुरत्॥ १०० ॥ वामश्चेति। तस्याः पुनः प्रशस्तिनिमित्तं संभवं संभावयन्नाह। हे जल असाः तवस

ख्याः वामः ऊरुः चलत्वं यास्यति चंचलत्वं प्राप्स्यति। किं क्रियमाणः मदीयैः कररुहपदैः नखव्रणस्थानैः मुच्यमानः। किं भूतः ऊ

रुः दैवगत्या दैववशेन मुक्ताजालं मौक्तिकपटलं त्याजितः कामिनीनां मेखला वलं वन ऊरुदंड संगिनो तु कारचूलः संभवति

अद्यापि नर्त्तकीचलनकांवस्येषु तदनुकारो दृश्यते। किं भूतः मुक्ताजालं चिरपरिचितं वश्च कालवशान्। किं भूतः ऊरुः सरसक

दलीस्तंभगौरः साई रंभास्तंभगौरः अपरं किं लक्षणः ऊरुः संभोगान्ते प्रियधुवनीते मम हस्तसंवाहनानां करस्पर्शानि नसत्तु

पचितानां योग्यः अतिशयेन स्तुत्या हस्तावनीया॥ १०२॥ १०१ १०२ १०२ १०१ १०१

तस्मिन्निति॥ स्ववल्लभायाः प्रणयं प्रकाशयन्नाह॥ हे जलद तस्मिन्काले वामनेत्रोर्वीः स्फुरणसमये यदि सा लब्धनिद्रासु-
खा स्यात् ततस्तेन वर्षर्त्तौ क्षणावतिशयनास्यनेआसीनः सनुपविष्टः सन् या ममान्तर्सहस्वप्रती द्वेप्याः किंभूतस्तं स्तनितविमु-
खः गर्जितपराङ्मुखः अस्यास्तव सख्याः मयि प्रणयिनि कथंचित् दैववशात् स्वप्नलब्धे सति गाढोपगूढं निविडालिंगनं सद्यः
कंठच्युतभुजलताग्रंथि माभूत्॥ इत्यातामिति स्ववल्लभाभावणमंबुदस्योपदिशन्नाह॥ हे विद्युद्गर्भ विद्युत् गर्भे यस्य सः। तस्य
संबोधने हे विद्युद्गर्भ तं तां मानिनीं धीरस्तनितवचनैः गंभीरगर्जितवाक्यैः वक्तुं प्रक्रमेथाः अत्र विद्युद्गर्भेति साभिप्रायं अंतर्ग-

हे विद्युद्गर्भ त्वं अन्यथा भीरुत्वात्। सा मे त्वपतीति भावः। किं कृत्वा अनिलेन वायुना मालतीनां जालकैः समं उत्थाप्य किंभूतेन।
अनिलेन स्वजलकणिकाशीतलेन किंभूतैः जालकैः अभिनवैः नूतनैः किंविशिष्टां तां प्रत्याश्वस्तां स्वस्थीभूतां किंभूतां तां स्ति-
मितनयनां। निश्चललोचनां क सति गवाक्षे त्वत्सनाथे सति त्वया सनाथे युक्तः त्वत्सनाथस्तस्मिन्॥ १०३॥ ॥१०३॥१०४



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥भर्तुरिति॥ मेघस्य दूतकर्मसमर्थयन्नाह॥ अत्र त्वद्दयितो दंतमादाय हतो हमागतः। सहसैव मुक्ता चिरविरहादित्युक्ते
सा पतिविना शोकनिपुणा जाया कदाचिज्जीवितं त्यजतीति संभावनया मेघस्तस्त्रिय प्राणितसत्ताबोधकसंबोधनेन ता॥
माश्वासयतत्संदेशं उपदिशन्नाह॥ हे अविधवे जीवितमत्ते केत्व मां भर्तुः प्रियं मित्रं अंबुवाहं मेघं विद्धि जानीहि॥ किंभू
तं मां तत्संदेशैः तस्य तव भर्तुः संदेशैः त्वत्समीपमागतं किंभूतैः तत्संदेशैः मानसि निहितैः चित्तारोपितैः अविस्मितैरि
त्यर्थः। यत्तेन संदिष्टं तत् मम मनागपि न विस्मृतमिति धाया। तया स्वस्य दूतगुणाधारत्वं बोधयति। यो मेघः पथि
मार्गे प्रोषितानाम् पथिकानां वृंदानि त्वरयति उत्सुकानि करोति। कैः ध्वनिभिः गर्जितैः किंभूतैः ध्वनिभिः मंद्रस्निग्धैः
गंभीरमधुरैः ननु प्रियोत्कंठितास्ते स्वयमेव सत्वरं तेइत्याह। यतः किंभूतानां प्रोषितानां श्रामयतां पदेभाजां कथंभूता निवेश
नि अबलावेणिमोक्षोत्सुकानि नायकावेणीमोक्षनोत्कंठितानि यः। खल्वहं प्रस्थानान्तपांथसार्थान्तिजप्रेयसीप्र
तिसत्वरं प्रस्थापयामि। तत्कथं त्वदीयमेकपतिं न त्वरं चूर्णमानेष्यामीति भावः॥१०४॥ १०५। १०६॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे॰टी॰ २२

॥ इतीति। तस्याः प्रतिश्रवणात् इमं चतुरस्रोपदिशन्नाह। हे सौम्य सा मद्वल्लभा इति सर्वोक्ते आख्याने कथिते सति। त्वां वी-
क्ष्य विलोक्य संभाव्य च कुशलसंभावणं कृत्वा अस्मात्परं कुशलसंभावणादनंतरं अविहितावधाना सती एवं वक्ष्य-
माणं संदेशं श्रोष्यति। किंभूता सा उत्कंगोच्छ्वसितहृदया उत्कंगभिः प्रेमोत्कलिकाभिः उच्छ्वसितं प्राप्तमुखावकाशं यस्याः

सा। किंभूता सा। उन्मुखी ऊर्ध्ववदना केव मैथिलीव सीतेव यथा सीता उन्मुखी सती पवननतनयं वीक्ष्य संभाव्य च अस्मात्प-
रं संभावणादनंतरं उत्कंगोच्छ्वसितहृदया सावधाना सती संदे[illegible]प्राप्तीत् सीमंतिनीनां नायकानां कांतोदंतो वल्लभसंदे-
शो सुहृदुपहृतो मित्रानीतः संगमात् किंचित् न्यूनो हीनो भवति॥१०५॥ १०५॥

राम: २२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥ तामिति ॥ प्रियायाः कुशलप्रश्नव्याजेन पुनरपि जनो निजजीवितसत्तां प्रतिपादयन्नाह ॥ हे आयुष्मन् मम वचनात् आत्मना
चउपकर्तुं उपकारं कर्त्तुं तावदन्तीम् एवं ब्रूयाः यत् अबले सहचरो मम भर्त्ता रामगिर्याश्रमस्थः त्वां कुशलं पृच्छति किंभूतः सहच
रः अव्यापन्नः अमृतः कुशलस्यार्थः ॥ किंभूतः सहचरः वियुक्तः वियोगी कृतः यतः कारणात् एतदेव कुशलं प्रथमे वक्तव्यं
प्रथमं प्रष्टव्यानीयं किंभूतानां प्राणिनां सुलभविपदां ॥ २०६ ॥ अंगेनेति ॥ एवं स्वावस्थाकथनेन निजानुरागम[illegible]

[illegible]पयन्नाह ॥ हे जलद त्वं तामिति ब्रूयाः हे अविधवे स तव भर्त्ता दूरवर्त्ती सन् त्वदीयैः संकल्पैः विशतीति क्रियाव्यतिः ॥

अंग

किंभूतं अंगेन शरीरेण कीदृशेन प्रतनु कृतं तथा तप्तं विरहत्वात् संतापयुक्तं इत्यर्थः तथा अस्रद्रवं बाष्पाविलं तथा अविर
तोत्कंठं निरुत्कंठितं तथा उच्छ्वासं अतिशयितनिःश्वासोपेतं कीदृशेन अंगेन तनुना दुर्बलेन गाढतप्तेन अस्रतेन तत
न तथा सोच्छ्वासेन तथा उत्कंठितेन अनुरागिणा ल तया समधिकतरोच्छ्वासिना दैवविवेरिणा विधिना रु
द्धमार्गः निविद्धपथः ॥ २०७ ॥ ॥ २०७ ॥ ॥ २०७ ॥ २०७ २०७ २०७ ॥

कथंभूतः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे·टी·
२५

॥ शशिशेखरमिति ॥ इदानीं पयोदस्वर्णां तनुभूतः संकेतोकितं संदेशमुपदिशन्नाह ॥ हे सखे सततं मत्तो उत्कं णविरचितप
देऽनुरागग्रथितेवाष्पे यथा भवति विधुमुखेन त्वां इदं तत् दाह कथयति । इदमिति किं । किलेति संबोधने यः सखीनां पुरस्ता
दालीनामग्रतो यत्तु शशिशेखरं रहःकल्पनीयं तत्तव कर्णे कथयतु मम भूते ॥ श्रुतौ वक्त्रेणाशान्न ॥ कस्मात् सुखस्पर्शकारणा
त् यतो लोलः चपलः किंभूतः यः श्रुतपथमतिक्रान्तः तथा लोचनाभ्यामदृश्यः नयनाभ्यामवलोक्यः ॥ १०८ ॥ श्यामा
मास्वंगमिति ॥ भूयः साऽऽदितिसदृशरूपाजलदमित्याह ॥ हन्त इति खेदे हे भीमचण्डि चित्त कस्मिंश्चित् एपि वस्तुनि तेतव सा

दृश्यं सदृश सत्वं एकस्थमेकत्रावस्थितं नोत्प्रेक्ष्यामि तदाह । श्यामासु वल्लीषु अंगं शरीरं अंगलतावर्तेतो दृष्टिपातं
चकितहरिणीप्रेक्षणेषु वलोकनेषु । वक्त्रच्छायां मुखशोभां शशिनि चंद्रमसि चोत्प्रेक्ष्यामि शिखिनां केकि
नां बर्हभारेषु विच्छसमूहेषु केशान् अलकान् आलोकयामि ॥ भ्रूविलासान्तनुषु कृशेषु नदीवीचिषु सरित्कल्लोले
षु चोत्प्रेक्ष्यामि ॥ १०९ ॥ १०९ १०९ १०९ ॥ ५९ ॥

रामः
२५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥त्वामिति॥ आत्मनः करुणावस्थां निरूपयन्नाह॥ हे मेघ त्वं तव भ्रातृजायाम् एवमूचे। हे प्रिये तस्मिन्काले खे क्रूरः करु-
णाविमुखः कृतान्तो दैवं नौ आवयोः संगमं योगं न सहते न निनिष्यते। यतः स्वां प्रणयकुपितां स्नेहरुष्टां त्वां धातुरागैः गै-
रिकादिवर्णैः शिलायां हृदि आलिख्य यावद् आत्मानं चरणपतितं कर्तुम् इच्छामि। अभिलषामि तावत् मे मम मह दृष्टिः अ-
स्रैः बाष्पैः आलुप्यते। आच्छाद्यते कथंभूतैः मुहुः वारं वारं उपचितैः स्थूलैः॥१०॥ धारासिक्तेति॥ विरहवशात् कामम-
पि व्यथां कथयितुमाह॥ हे दयिते अस्मिन्नधर्मेतिसववर्षाकाले वासराणि दिनानि कथं केन प्रकारेण व्रजेयुः गच्छे-
युः इति वियोगेन वयं जानीमः। कीदृशानि दिनानि दिक्संयुक्तप्रविरलघनव्यस्तसूर्यातपानि दिशि संसग्नो यः प्र-
विरलो मेघस्तेन ध्वस्तो निराकृतो य आतपो घर्मो येषु तानि यतः पंचबाणः कंदर्पः प्रतनुम् अपि कृशाम् अपि मां हिणोति
पीडयति॥ कंभूतं मां असपत्नसुखस्य दूरीभूतं किंभूतस्य सुखस्य धारासिक्तस्थलसुरभिणः धाराभिः संपातं नेसि-
क्तं यत् स्थलं तद्वत् सुरभितस्य॥११॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे॰टी॰
२५

॥मामिति॥ त्वद्विरहदुःखितया मां लोकानाम नाधिष्ठायिन्यो देव्यः कष्टमनुभवंतीत्याह। हे वल्लभ स्थलीदेवतानां।
वनवासिनीनां खलु इति निश्चयेन अश्रुलेशाः नयनोद्भुकणाः तरुकिशलयेषु द्रुमपल्लवेषु वहुशोऽनेकवारं किं न प
तंति इति न किंतु पतंतीत्यर्थः। किंविशिष्टाः अश्रुलेशाः मुक्तास्थूलाः मुक्तामणिप्रमाणाः। किं कुर्वतीनां आकाशप्र
णिहितभुजं मां वियत्प्रसारितवाहुं मां परस्पतीनां। कथमपि महता कष्टेन मया स्वप्नसंदर्शनेषु लब्धायाः प्राप्तायाः ते
तव निर्दयाश्लेषहेतोः गाढालिंगनकारणात् आकाशप्रणिहितभुजं॥१२॥ भित्त्वेति॥ त्वद्विरहे लक्षितो विमृष्टज्ञानाः

हा हे मेघ त्वं इति कथये। हे गुणवति ते हिमाद्रिवाताः हिमाचलपवनाः इति कारणात् आलिंग्यंते। इतीति किं। किलेति
संभावनायां। एभिर्वातैः यदि कदाचिदपि तवांग शरीरं पूर्वस्पृष्टं भवेत्। आश्लिष्टं स्यात्। कीदृशाः वाताः दक्षिणेन प्र
वृत्ताः। दक्षिणदिशि आगताः। किं कृत्वा। देवदारुद्रुमाणां सुरभिवृक्षाणां किशलयपुटान् पल्लवान् मुक्त्वा तत्सद्यस्तत्
कालं भित्वा विदार्य। कीदृशाः वाताः तत्क्षीरस्रुतिसुरभयः देवदारुदुग्धस्रुतिसुगं
धिताः॥१३॥

रामः
२६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥सं मिति॥ प्रकारांतरेण विरहातिशयं प्रकाशयन्नाह॥ हे चटुलनयने चंचलनेत्रे इत्थममुना प्रकारेण त्वद्वियोगव्य
थाभिः त्वद्विप्रलंभपीडाभिः मम चित्ते अशरणे न विद्यते शरणं स्थानं यस्य तत्ते कीदृशे गुरुविप्रलंभप्रार्थनं दुर्ल्लभा यांचा
प्रार्थना यस्य। कीदृशीभिर्व्यथाभिः गाढोष्माभिः प्रबलतापाभिः। इत्थमिति किं चिंत्यं। हे कांते दीर्घयामाः प्रलंबप्रहराः त्रि
यामाः रात्रयः कथं केन प्रकारेण क्षणमिव मुहूर्त्तमिव संक्षिप्यंते नीयंते अहरपि दिनमपि सर्वासु अवस्थासु सर्वकाले
षु मंदमंदातपं ईषदीषदुष्णं कथं केन प्रकारेण स्यात् भवेत्॥११४॥ इतीति॥ इदानीं जलधरस्य संदेशद्वारेण प्रिया

माश्वासयितुमाह॥ हे कल्याणि हे शोभने अहमिति पूर्वोक्तप्रकारेण आत्मनैव बहु विगणयन् पर्यालोचयन् आ
त्मानं अवलंबे अवधारयामि तत्तस्मात्कारणात् त्वमपि कातरत्वं भीरुतां मागमः मा यासीः सुतरामतिशयेन। हे प्रिये कस्य
जनस्यात्यंतं अवछिन्नं सुखमुपनतं कल्याणं आपदं वा अप्युपनतं एकांततो नैरंतर्येण दुःखं कष्टं च उपनतं प्राप्तं यतः कार
णात् दशा अवस्था चक्रनेमिक्रमेण चक्रधारान्यायेन नीचै रधस्तात् गच्छति उपरि ऊर्ध्वं च गच्छति॥११५॥ ॥११५॥११५

मे॰टी॰
२१

॥ आपांत इति। जलदस्य संदेशसंपादनेन स्वशापावधिं निवेदयन्नाह॥ हे कामिन् भुजगशयनात् सर्पशय्यायाः सका
शात् उत्थिते जाग्रते शार्ङ्गपाणौ नारायणे कार्त्तिकस्य लौकादशपक्षे मम शापांतः आक्रोशादेव सा नो भविष्यति संप्रस्पते अ
तः शेषान् चतुरो मासान् लोचने मीलयित्वा ऽहि लीनि मीलय गमय यापय। पश्चात् शापावसाने अनंतरं आवां द्वौ जनौ ह
पास्तुरा त्रिवुतत् संगमोस्ति अभिलषमीप्सितं निर्विशाव उपभोक्ष्यावः। कीदृशं विरहगुणितं वियोगवर्धितं कीदृशासु श
रूढाः शरज्योत्स्नासु ॥४६॥ भूयश्चाहमिति। पुनरपि रन्यसामिस्तानांतरे राजीमूतं संदेशमाह॥ हे प्रिये शाय

ने शय्यनीये राज्ञो मत्कंठलग्ना सती निद्रां गत्वा प्राप्य त्वं सत्वरं सप्रलापं यथा भवति एवं। किमपि रुदती विलपंती विप्रबु
द्धा जागृता त्वया असकृत् वारं वारं पृष्टो मम सांतर्हासं सस्मितं कथितं प्रकटीकृतं किं कथितमित्याह। हे कितव हे धूर्त स्व
प्ने स्वप्नावस्थायां त्वं कामपि वधूं रमयन् क्रीडयन् मया दृष्टः आलोकितः ॥४७॥ ॥४७॥ ॥४७॥ ४७॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रामः
२१

॥ श्रावणकं ॥ जलवस्य संपेशसं ॥ एतस्मादिति। इदानीं सकाशात्त्वया पनेन आत्मनि विश्वासमुत्पादयितुमाह
हे असितनयने एतस्मात् प्रोक्तादभिज्ञानदानात् संकेतकथनात् मां कुशलिनं विदित्वा विधुधामयि विषये अविश्वासिनी
विश्वासरहिता माभूत् मामविश्वासिन्न एवं मात्याज्ञीरित्यर्थः। कस्मात् कौलीनात् जनवादात्। हे प्रिय स्नेहात् प्रणयात्।

अविरहे वियोगे सति प्रेंम्णिनो विंनाश्निनः स्नेहाभावात् आकुः कथयंति। अहमिति मन्ये ते स्नेहाः अन्योन्यानुरक्ताः यदिस्म
टेहहेऽभिहेवस्त्र निजनः अभोगादनुष्णाभुजनात् उपधितरसाः पुष्टाः प्रेमराशी भवंति प्रचुराः संपद्यंते ॥११८॥ ११८॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे.टी.
२८

॥ आश्वास्यैति ॥ अधुना स्वकौशल्येन प्रियामाश्वास्य तस्याः संदेशदानेनात्मनो जीवितसमवलंबयितुं वल्लाहकमाह ॥
हे धाराधर त्वद्वचोभिः तस्याः वधाः वचनैः ममापि जीवितं धारयेथाः कीदृशैः साभिज्ञानप्रहितकुशलैः साभिज्ञानेन संके
तेन प्रहितं दापितं कुशलं निहितं चैस्तु तानितैः । कीदृक् जीवितं कुंदप्रसववच्छिथिलं कुंदकुसुमवच्छिथिलं । कीदृशास्त्वं अ

८४

स्मात् शर्वोत्कात् क्रीडाशैलात् निवृत्तो व्याघुटितः । कीदृशात् शैलात् त्रिनयनवृषेण हरवाहनेन उत्खातं उल्लिखितं कूटं शि
खरं यस्य तस्मात् । किं कृत्वा एतो तव सखीं आश्वास्य स्वस्थीकृत्य । किंभूतां प्रथमविरहोदग्रशोकां प्रथमवियोगेन उदग्रः
अधिकः शोको यस्याः सा तां । ११८ ॥ ॥११८॥ ॥११९।११८

रामः
२८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥एवं यथात्वत्संदेशैः यत्तत्पयोधरप्रतिवचनसमाकर्णस्मिताभीर्यमारोपयन्नाह॥ कच्चिदिति अभीष्टप्रश्ने हे सौम्य इदमेतत् संदेशाद्दानलक्षणं मम बंधुकृत्यं मित्रकरणीयं त्वया व्यवसितमंगीकृतं न प्रत्यादेशात् अनिराकरणात्। धीर तांत कर्कयानि संभावये। यतः त्वं याचितः प्रार्थितः सन् कुतः हे सौम्य त्वया न प्रत्यादिष्टं। निःशब्दोपि त्वं ध्वनिरहितो पि त्वं चातकेभ्यो पानीयं

प्रदिशसि वितरसि। अवियुक्तो यमर्थः हि स्फुटं सतां सत्पुरुषाणां प्रणयिषु विषये ईप्सितार्थक्रियैव अभिलषितवस्तुसंपादनमेव यत् त्वं प्रतिवचनं॥२०॥ ॥१२०॥ १२० १२० १२०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे.दी.
२९

॥एतदिति॥ निखिलदुःखानां वधूविरहदुःखं कष्टं वदन्निति जलदे तस्मिन्सत्त्रमात्री वादं प्रयोक्तुमाह॥ हे जलद आद्र
र्षिवर्षाकालेन संभृतश्रीरूपचितलक्ष्मीकः सन् अभिलषितान्देशान्विचर रमस्व किं त्वमस्मिन्विषये सौहार्दान्
सुहृत्वान् । वा अथवा विधुरो विकलो यमिति । वा अनुक्रोशबुद्ध्या करुणया वा एतत्संदेशसंपादनलक्षणं ममप्रियमनीप्सि
तं कृत्वा कीदृशस्य मम अनुचिते प्रार्थनावत्सं याञ्चां गतो यस्य सः तस्य हे मित्र तव क्वापि क्षणमपि मुहूर्तमपि विद्युता सौदा
मिन्या सार्धं वियोगो माभूत् । [illegible] ॥१२१॥ तमिति । जलधरवरो मेघश्रेष्ठः तं संदेशं दिव्यवाचा ऽऽचच

क्षे । कथयामास । किं कर्तुं तस्याः यक्षवध्वाः प्राणान् रक्षितुं किंभूतः जनहितरतः यो पि यक्षः वधूरपि स्वभर्तुर्निजवृत्तं सुरुदंतं
प्राप्य प्रमुदितमनाः तस्यौ हृष्टचित्ताबभूव । युक्तो यमर्थः हि स्फुटं निश्चितं केषां पुरुषाणां प्रार्थनायांचाऽऽत्तमे पुर्विषये अ
भिमतफला नस्युः अभीष्टकालाः न भवंति अपितु न भवंत्येव ।१२२॥ ॥१२३॥ १२२॥ १२२॥ ॥

रामः
२९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥स्मृत्वेति॥ इदानीं दैववशात् विरहवशात् विरहवतोः तयोः संगमं कविराह॥ धनेशः कुबेरः जलदकथितो मेघकथि-
तो वार्त्तासंदेशं स्मृत्वा तौ दंपती स्त्रीपुरुषौ इष्टान् अभिलषितान् भोगान् अनवरतं निरंतरं भोजयामास अभूभुजत्॥
किं कृत्वा सद्यस्तत्कालमेव शापस्यांतं विधाय अवसानं कृत्वा यतः सदयहृदयो दयार्द्रचेताः तथा त्यक्तकोपः अस्तमित
क्रोधः पुनः किं कृत्वा एतौ द्वौ संयोज्य मेलयित्वा कीदृशौ द्वौ विगलितशुचौ गतशोकौ अत एव हृष्टचित्तौ। कथं भोजयामा-
स अविरतसुखं अविरतानि निरंतराणि सुखानि यथा तत्॥१२३॥ इति श्रीकविराजमुकुटालंकारेण श्रीकविकालि-

दासेन कृतं मेघदूताभिधानेकाव्यं तस्य टीका समाप्ता॥ १॥ रूपांकाहींदुमाने ऽब्दे ऊर्जे मासि सिते दले। द्वितीयायां
सोमवधीशे यामग्रे णादशात्मनि।१॥ लिलेख मेघदूतस्य टीकां शिशुहितैषिणीम् सामाचंद्रिणी णे शोहिजीवानंद
स्य पौत्रकः॥२॥ मेघदूतटीका लिखिता गणेशदत्त गौर्जरेण संवत्सरे १८८९ चंद्रकाहि इथिवी मिते कार्त्तिकशुक्लेत्र
ह्लणे तिथौ हिमांशोः वासरे पट्टालयपुरे [illegible] निशायाः प्रथमप्रहरे॥१॥ १८



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative